# 1 संगच्छध्वं संवदध्वम्

**1.** संज्ञानसूक्तं सस्वरं पठत स्मरत लिखत च।

**उत्तरम्—** स्व शिक्षकेन सह कुरुत।

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

(क) सर्वेषां मनः कीदृशं भवेत्?

**उत्तरम्—** सर्वेषां मनः समानं भवेत्।

(ख) सङ्गच्छध्वं संवदध्वम् इत्यस्य कः अभिप्रायः?

**उत्तरम्—** मिलित्वा अग्रे गच्छत सौमनस्येन वदत।

(ग) सर्वे किं परित्यज्य ऐक्यभावेन जीवेयुः?

**उत्तरम्—** सर्वे मनोभेदं परित्यज्य ऐक्यभावेन जीवेयुः।

(घ) अस्मिन् पाठे का प्रेरणा अस्ति?

**उत्तरम्—** अस्मिन् पाठे ऐक्यभावस्य सौमनस्य च प्रेरणा अस्ति।

**3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) परमेश्वरः सर्वत्र व्याप्तः अस्ति।

**उत्तरम्—** कः सर्वत्र व्याप्तः अस्ति?

(ख) वयम् ईश्वरं नमामः।

**उत्तरम्—** वयम् कं नमामः?

(ग) वयं ऐक्यभावेन जीवामः।

**उत्तरम्—** वयं केन भावेन जीवामः?

(घ) ईश्वरस्य प्रार्थनया शान्तिः प्राप्यते?

**उत्तरम्—** कस्य प्रार्थनया शान्तिः प्राप्यते?

(ङ) अहं समाजाय श्रमं करोमि।

**उत्तरम्—** अहं कस्मै श्रमं करोमि?

(च) अयं पाठः ऋग्वेदात् सङ्कलितः।

**उत्तरम्—** अयं पाठः कस्मात् सङ्कलितः?

(छ) वेदस्य अपरं नाम श्रुतिः।

**उत्तरम्—** कस्य अपरं नाम श्रुतिः?

(ज) मन्त्राः वेदेषु भवन्ति।

**उत्तरम्—** मन्त्राः केषु भवन्ति?

**4. पट्टिकातः शब्दान् चित्वा अधोलिखितेषु मन्त्रेषु रिक्तस्थानानि पूरयत—**

| |
|---|
| संवदध्वं, समितिः, आकूतिः, भागं, मनः, हृदयानि, जानाना, समानं, मनो, हविषा, सुसहासति, मनांसि |

(क) सङ्गच्छध्वं ............ सं वो ............ जानताम्।
देवा ............ यथा पूर्वे सं ............ उपासते।

(ख) समानो मन्त्रः .......... समानी समानं ............ सह चित्तमेषाम्।
............ मन्त्रमभिमन्त्रये वः समानेन वो ............ जुहोमि।

(ग) समानी व ............ समाना ............ वः।
समानमस्तु वो ............ यथा वः ............।

**उत्तरम्—**

(क) संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवां भागं यथा पूर्वे संजानाना उपासते॥

(ख) समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि॥

(ग) समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति॥

**5. पाठे प्रयुक्तान् शब्दान् भावानुसारं परस्परं योजयत—**

| | | |
|---|---|---|
| (क) संगच्छध्वम् | — | सेवन्ते |
| (ख) संवदध्वम् | — | चित्तम् |
| (ग) मनः | — | मिलित्वा चलत |
| (घ) उपासते | — | सङ्कल्पः |
| (ङ) वसूनि | — | समस्तानि |
| (च) विश्वानि | — | एकस्वरेण वदत |
| (छ) आकूतिः | — | धनानि |

**उत्तरम्—**

| | | |
|---|---|---|
| (क) संगच्छध्वम् | — | मिलित्वा चलत |
| (ख) संवदध्वम् | — | एकस्वरेण वदत |
| (ग) मनः | — | चित्तम् |
| (घ) उपासते | — | सेवन्ते |
| (ङ) वसूनि | — | धनानि |
| (च) विश्वानि | — | समस्तानि |
| (छ) आकूतिः | — | सङ्कल्पः |

**6. उदाहरणानुसारेण लट्लकारस्य वाक्यानि लोट्-लकारेण परिवर्तयत—**

| | |
|---|---|
| यथा—बालिकाः नृत्यन्ति। | .....बालिकाः नृत्यन्तु..... |
| (क) बालकाः हसन्ति | ............................ |
| (ख) युवां तत्र गच्छथः | ............................ |
| (ग) यूयं धावथ | ............................ |
| (घ) आवां लिखावः | ............................ |
| (ङ) वयं पठामः | ............................ |

**उत्तरम्—**

| | |
|---|---|
| (क) बालकाः हसन्ति। | बालकाः हसन्तु। |
| (ख) युवां तत्र गच्छथः। | युवां तत्र गच्छतम्। |
| (ग) यूयं धावथ। | यूयं धावत। |
| (घ) आवां लिखावः। | आवां लिखाव। |
| (ङ) वयं पठामः। | वयं पठाम। |

## परियोजनाकार्यम्

१. अस्य सूक्तस्य भावार्थं मित्रैः सह मातृभाषया चर्चयत।

**उत्तरम्—** छात्राः स्वशिक्षकेन महोदयेन मित्रैः सह च स्वयमेव कुर्वन्तु।

२. संज्ञानसूक्तम् इव ऋग्वेदस्य पञ्चानां सूक्तानां नामानि लिखत।

**उत्तरम्—** (i) अग्निसूक्तः (ii) वरुणसूक्तः (iii) इन्द्रसूक्तः (iv) वायुसूक्तः (v) कितवसूक्तः।

३. संज्ञानसूक्तस्य आधारेण भवत्सु एकतां स्थापयितुं विविधान् उपायान् अध्यापकैः सह आलोचयत। (संज्ञानसूक्त के आधार पर आपस में एकता स्थापित करने के लिए विभिन्न उपायों का अध्यापकों के साथ विचार करें।)

**उत्तरम्—** छात्राः अध्यापकैः सह स्वयमेव आलोचयन्तु।

# अतिरिक्त अभ्यासः

**1. समुचितं विकल्पं चित्वा तस्य क्रमाक्षरं लिखत—**

(i) कस्मात् वेदात् अयं पाठः गृहीतः? (यह पाठ किस वेद से लिया गया है?)

(अ) ऋग्वेदात् (ब) यजुर्वेदात्
(स) सामवेदात् (द) अथर्ववेदात्

(ii) संहिता किम् उच्यते? (संहिता किसे कहते हैं?)

(अ) मन्त्राणाम् संग्रह (ब) मूल वैदिक मन्त्र पाठः
(स) श्लोक संग्रह (द) दिव्य काव्याम्

(iii) विश्वस्य प्राचीनतमं साहित्यं किं मन्यते?

(अ) वेदः (ब) पुराणानि
(स) दर्शनानि (द) काव्यानि

(iv) वेद मन्त्राणाम् उच्चारणं कथं कुर्म? (वेदमन्त्रों का उच्चारण कैसे करें?)

(अ) नेत्रे मीलयित्वा (ब) एकाग्र चित्तेन
(स) समवेतन स्वरेण (द) सर्वैः

(v) कीदृशानि वस्त्राणि परिधाय वेदनामं उच्चारणं कुर्यात्।

(अ) शुद्ध वस्त्राणि
(ब) नव वस्त्राणि धारयित्वा
(स) जीर्ण वस्त्राणि धारयित्वा
(द) सर्वाणि।

**उत्तरम्—** (i) (अ), (ii) (ब), (iii) (अ), (iv) (द), (v) (अ)।

**2. समुचितपदेन रिक्तस्थानं पूरयत—**

(क) सं वो ................ जानताम्।
(ख) यथापूर्वे ................ उपासते।
(ग) समानो मन्त्रः ................ समानी।
(घ) समानं मनः सह ................।
(ङ) समानेन वो ................ जुहोमिः।

**उत्तरम्—** (क) मनांसि, (ख) संजानाना, (ग) समितिः, (घ) चित्तमेषाम्, (ङ) हविषा।

**3. सत्यम् असत्यं वा चिनुत—**

(क) वेदस्य चत्वारः संहिताः।

(ख) वेद: विष्णुमुखात् नि:सृत:।

(ग) वेद: अधुनातन भारतीय ज्ञानपरम्परा।

(घ) समानं मन्त्रमभिमन्त्रय व:।

(ङ) नेत्रे उन्मील्य वेद मन्त्राणाम् उच्चारणं कुर्म:।

**उत्तरम्—** (क) सत्यम्, (ख) असत्यम्, (ग) सत्यम्, (घ) सत्यम्, (ङ) असत्यम्।

**4. 'क' स्तम्भे वैदिकपदानि दत्तानि 'ख' स्तम्भे तेषां पर्याय पदानि दत्तानि, तयो: समुचितं मेलनं कुरुत—**

| **(अ)** | | **(ब)** |
|---|---|---|
| (क) जुहोमि | — | प्रार्थनया |
| (ख) संजानताम् | — | लक्ष्यसिद्धि: |
| (ग) चित्तम् | — | सम्यग् जानीत |
| (घ) हविषा | — | बुद्धिजन्यं ज्ञानम् |
| (ङ) समिति: | — | ज्ञान यज्ञं संपादयामि |

**उत्तरम्—**

| **(अ)** | | **(ब)** |
|---|---|---|
| (क) जुहोमि | — | ज्ञान यज्ञं संपादयामि |
| (ख) संजानताम् | — | सम्यग् जानीत |
| (ग) चित्तम् | — | बुद्धिजन्यं ज्ञानम् |
| (घ) हविषा | — | प्रार्थनया |
| (ङ) समिति: | — | लक्ष्यसिद्धि: |

**5.** एकपदेन उत्तरत—

(क) आकूति: कीदृशी भवतु।

**उत्तरम्—** समानी (समान हो)।

(ख) मनुष्य: कथं गच्छेत्?

**उत्तरम्—** संगच्छध्वम्

(ग) मनांसि कथं जानताम्?

**उत्तरम्—** सम्यग् जानीत।

(घ) ब्रह्मण: मुखात् किं नि:सृत:?

**उत्तरम्—** वेद:।

(ङ) को वेदो अन्तिम:।

**उत्तरम्—** अथर्ववेद:।

**6. पूर्णवाक्येन उत्तरत—**

(क) देवा: भागं कथं गृहीतवन्त:?

**उत्तरम्—** सृष्टे: प्रारम्भकाले देवा: सृष्टिनिर्माण यज्ञस्य साफल्यार्थं स्व-कर्त्तव्यं स्वीकृत्य समन्वयपूर्वके स्व-स्वकर्म निर्वहन्।

(ख) वेद: विद्वद्भि: कथं मन्यते?

**उत्तरम्—** वेदा: अद्य विश्वस्य प्राचीनतमं साहित्य रूपेण विद्वद्भि: मन्यन्ते।

(ग) समवेत स्वरेण कस्य उच्चारणं भवति?

**उत्तरम्—** समवेत स्वरेण वेदमन्त्राणाम् उच्चारणं भवति।

(घ) किं सूक्तं एकताया समानताया: च संदेशं ददाति?

**उत्तरम्—** संज्ञानसूक्तं समानताया: एकताया च सन्देशं ददाति।

(ङ) सर्वे कथं वेदमन्त्राणाम् उच्चारणार्थम् आगच्छन्तु?

**उत्तरम्—** भवन्त: सर्वे स्नात्वा, शुद्ध वस्त्राणि परिधाय पादत्राणं बहि: स्थापयित्वा अस्यां प्रार्थनासभायां समुपस्थिता: सन्तु।

(च) एतै: मन्त्रै: किं प्रेरणा लभ्यते? (इन मन्त्रों से क्या प्रेरणा मिलती है?)

**उत्तरम्—** एतै: मन्त्रै संघटित रूपेण सद् जीवनस्य कृते प्रेरणा लभ्यते।

# 2 अल्पानामपि वस्तूनां संहति: कार्यसाधिका

**1. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत—**

(क) मित्राणि ग्रीष्मावकाशे कुत्र गच्छन्ति?

**उत्तरम्—** उत्तराखण्डम्।

(ख) सर्वत्र क: प्रसृत:?

**उत्तरम्—** अन्धकार:।

(ग) क: सर्वान् प्रेरयन् अवदत्?

**उत्तरम्—** नायक: सुधीर:।

(घ) क: हितोपदेशस्य कथां श्रावयति?

**उत्तरम्—** सुधीर: नायक:।

(ङ) कपोतराजस्य नाम किम्?

**उत्तरम्—** चित्रग्रीव:।

(च) व्याधः कान् विकीर्य जालं प्रसारितवान्?

**उत्तरम्—** तण्डुलकणान्।

(छ) विपत्काले विस्मयः कस्य लक्षणम्?

**उत्तरम्—** कापुरुषस्य।

(ज) चित्रग्रीवस्य मित्रं हिरण्यकः कुत्र निवसति?

**उत्तरम्—** गण्डकीतीरे चित्रवने।

(झ) चित्रग्रीवः हिरण्यकं कथं सम्बोधयति?

**उत्तरम्—** किं न संभाषसे?

(ञ) पूर्वं केषां पाशान् छिनत्तु इति चित्रग्रीवः वदति?

**उत्तरम्—** आश्रितानाम।

**2. पूर्णवाक्येन उत्तरं लिखत—**

(क) यदा केदारक्षेत्रम् आरोहन्तः आसन् किम् अभवत्?

**उत्तरम्—** तदा लक्ष्यप्राप्तेः पूर्वं वेगेन वृष्टिः आरब्धा।

(ख) सर्वे उच्चस्वरेण किं प्रार्थयन्तः?

**उत्तरम्—** हे भगवन्! रक्ष अस्मान् रक्ष।

(ग) असम्भवं कार्यं कथं कर्तुं शक्यते इति कः उक्तवान्?

**उत्तरम्—** असम्भवं कार्यं कथं कर्तुं शक्यते इति नायकः उक्तवान्।

(घ) निर्जने वने तण्डुलकणान् दृष्ट्वा चित्रग्रीवः किं निरूपयति?

**उत्तरम्—** कुतः अत्र निर्जनवने तण्डुलकणानां सम्भवः इति निरूप्यताम्।

(ङ) किं नीतिवचनं प्रसिद्धम्?

**उत्तरम्—** 'अल्पानाम् अपि वस्तूनां संहतिः कार्यसाधिका।

(च) व्याधात् रक्षां प्राप्तुं चित्रग्रीवः कम् आदेशं दत्तवान्?

**उत्तरम्—** चित्रग्रीवः कपोतानाम् आदिष्टवान्।

(छ) हिरण्यकः किमर्थं तूर्ष्णीं स्थितः?

**उत्तरम्—** कपोतानाम् अवपातु भयात् चकितः तूष्णीम् अभवत्।

(ज) पुलकितः हिरण्यकः चित्रग्रीवं कथं प्रशंसति?

**उत्तरम्—** पुलकितः हिरण्यकः अब्रवीत्–'साधु मित्र! साधु। अनेन आश्रितवात्सलेयन त्वं त्रैलोकस्यापि स्वामित्वं प्राप्तुं योग्योऽसि।

(झ) कपोताः कथं आत्मरक्षणं कृतवन्तः?

**उत्तरम्—** आपद्गताः कपोताः बुद्धिबलेन संघटनसामर्थ्येन च आत्म रक्षणं कृतवन्तः।

(ञ) नायकस्य प्रेरकवचनैः सर्वेऽपि किम् अकुर्वन्?

**उत्तरम्—** उत्साहिताः सर्वेऽपि भयं, शोकं सन्देहं च विहाय सेतुनिर्माण कार्ये संलग्नाः जाताः।

**3. अधोलिखितानि वाक्यानि पठित्वा ल्यप्-प्रत्ययान्तेषु परिवर्तयत—**

(क) छात्रः कक्षां प्रविशति। संस्कृतं पठति।

(ख) भक्तः मन्दिरम् आगच्छति। पूजां करोति।

(ग) माता भोजनं निर्माति। पुत्राय ददाति।

(घ) सुरेशः प्रातः उत्तिष्ठति। देवं नमति।

(ङ) रमा पुस्तकं स्वीकरोति। विद्यालयं गच्छति।

(च) अहं गृहम् आगच्छामि। भोजनं करोमि।

(छ) तण्डुलकणान् विकिरति। जालं विस्तारयति।

(ज) व्याधः तण्डुलकणान् अवलोकते। भूमौ अवतरति।

**उत्तरम्—** (क) छात्रः कक्षां प्रविश्य संस्कृतं पठति।

(ख) भक्तः मन्दिरम् आगत्य पूजां करोति।

(ग) माता भोजनं निर्माय पुत्राय ददाति।

(घ) सुरेशः प्रातः उत्थाय देवं नमति।

(ङ) रमा पुस्तकं स्वीकृत्य विद्यालयं गच्छति।

(च) अहं गृहम् आगत्य भोजनं करोमि।

(छ) तण्डुलकणान् विकीर्य जालं विस्तारयति।

(ज) व्याधः तण्डुलकणान् अवलोक्य भूमौ अवतरति।

**4. उदाहरणानुसारम् उपसर्गयोजनेन क्त्वा-स्थाने ल्यप्-प्रत्ययस्य प्रयोगं कृत्वा पदानि परिवर्तयत—**

| सम्, आ, उप, उत्, वि, प्र |
|---|

(क) छात्रः गृहं गत्वा भोजनं करोति।

(ख) माता वस्त्राणि क्षालयित्वा पचति।

(ग) शिक्षकः श्लोकं लिखित्वा पाठयति।

(घ) रमा स्थित्वा गीतं गायति।

(ङ) शिष्यः सर्वदा गुरुं नत्वा पठति।

(च) लेखकः आलोचनं कृत्वा लिखति।

**उत्तरम्—** (क) छात्रः गृहम् आगत्य (आ + गम् + ल्यप्) भोजनं करोति।

(ख) माता वस्त्राणि प्रक्षाल्य (प्र + क्षाल् + ल्यप्) पचति।

(ग) शिक्षक: श्लोकं विलिख्य (वि + लिख् + ल्यप्) पाठयति।

(घ) रमा उत्थाय (उद् + स्था + ल्यप्) गीतं गायति।

(ङ) शिष्य: सर्वदा गुरुं प्रणम्य (प्र + नम् + ल्यप्) पठति।

(च) लेखक: समालोच्य (सम् + आ + लोच् + ल्यप्) लिखति।

**5. पाठे प्रयुक्तेन उपयुक्तपदेन रिक्तस्थानं पूरयत—**

(क) सर्वै: एकचित्तीभूय .................. उड्डीयताम्।

(ख) जालापहारकान् तान् ...................... पश्चाद् अधावत् ।

(ग) अस्माकं मित्रं .................... नाम मूषकराज: गण्डकीतीरे चित्रवने निवसति।

(घ) हिरण्यक: कपोतानाम् .................. चकितस्तूष्णीं स्थित: ।

(ङ) यतोहि विपत्काले .................. एव कापुरुषलक्षणम्।

**उत्तरम्—** (क) जालामादाय, (ख) अवलोक्य, (ग) हिरण्यको, (घ) अवपातभयात्, (ङ) विस्मय:।

**6. पाठे प्रयुक्तेन ल्यप् प्रत्ययान्त पदेन सह उपयुक्तं पदं योजयत—**

| | | |
|---|---|---|
| (क) | विकीर्य | जालम् |
| (ख) | विस्तीर्य | जालापहारकान् |
| (ग) | अवतीर्य | उड्डीयताम् |
| (घ) | अवलोक्य | तद्वचनम् |
| (ङ) | एकचित्तीभूय | भूमौ |
| (च) | प्रत्यभिज्ञाय | तण्डुलकणान् |

**उत्तरम्—**

| | | |
|---|---|---|
| (क) | विकीर्य | तण्डुलकणान् |
| (ख) | विस्तीर्य | जालम् |
| (ग) | अवतीर्य | भूमौ |
| (घ) | अवलोक्य | जालापहारकान् |
| (ङ) | एकचित्तीभूय | उड्डीयताम् |
| (च) | प्रत्यभिज्ञाय | तद्वचनम् |

**7. समासयुक्तपदेन रिक्तस्थानं पूरयत—**

| | | |
|---|---|---|
| (क) | गण्डक्या: तीरम् | = ......गण्डकीतीरम्...... |
| | तस्मिन् | = ......गण्डकीतीरे....... |
| (ख) | तण्डुलानां कणा: | = ........................ |
| | तान् | = ........................ |
| (ग) | जालस्य अपहारका: | = ........................ |
| | तान् | = ........................ |
| (घ) | अवपाताद् भयम् | = ........................ |
| | तस्मात् | = ........................ |
| (ङ) | कापुरुषाणां लक्षणम् | = ........................ |
| | तस्मिन् | = ........................ |

**उत्तरम्—**

| | | |
|---|---|---|
| (ख) | तण्डुलानां कणा: | = तण्डुलकणा: |
| | तान् | = तण्डुलकणान् |
| (ग) | जालस्य अपहारका: | = जालापहारका: |
| | तान् | = जालापहारकान् |
| (घ) | अवपाताद् भयम् | = अवपातभयाम् |
| | तस्मात् | = अवपातभयात् |
| (ङ) | कापुरुषाणां लक्षणम् | = कापुरुषलक्षणम् |
| | तस्मिन् | = कापुरुषलक्षणे |

**8. सार्थकपदं ज्ञात्वा सन्धिविच्छेदं कुरुत—**

| | | |
|---|---|---|
| (क) | इत्याकर्ण्य | = ''इति'' + ''आकर्ण्य''। |
| (ख) | चित्रग्रीवोऽवदत् | = चित्रगीव:''+'अवदत्'। |
| (ग) | बालकोऽत्र | = ........... + ........... |
| (घ) | धैर्यमथाभ्युदये | = ........ + ........ + ........ |
| (ङ) | भोजनेऽप्यप्रवर्तनम् | = ........ + ........ + ........ |
| (च) | नमस्ते | = ........ + ........ |
| (छ) | उपायश्चिन्तनीय: | = ........ + ........ |
| (ज) | व्याधस्तत्र | = ........ + ........ |
| (झ) | हिरण्यकोऽप्याह | = ........ + ........ + ........ |
| (ञ) | मूषकराजो गण्डकीतीरे | = ........ + ........ + ........ |

(ट) अतस्त्वाम् = ……… + ………

(ठ) कश्चित् = ……… + ………

**उत्तरम्—**

(ग) बालकोऽत्र = बालक: + अत्र।

(घ) धैर्यमथाभ्युदये = धैर्यम् + अथ + अभ्युदये।

(ङ) भोजनेऽप्यप्रवर्तनम् = भोजने + अपि + अप्रवर्तनम्।

(च) नमस्ते = नम: + ते।

(छ) उपायश्चिन्तनीय: = उपाय: + चिन्तनीय:।

(ज) व्याधस्तत्र = व्याध: + तत्र।

(झ) हिरण्यकोऽप्याह = हिरण्यक: + अपि + आह।

(ञ) मूषकराजो गण्डकीतीरे = मूषकराज: + गण्डकी + तीरे।

(ट) अतस्त्वाम् = अत: + त्वाम्।

(ठ) कश्चित् = क: + चित्।

## परियोजनाकार्यम्

**1. पाठात् अधोलिखितानां क्रियापदानां प्रयोगकौशलं ज्ञात्वा तत्समानानि अन्यानि वाक्यानि रचयत—**

| तिरस्कुर्वन्ति, क्रियताम्, निवसति, आह, छेत्स्यति, सम्भाषसे, अब्रवीत्, उपसर्पति, युज्यते |
|---|

यथा— तिरस्कुर्वन्ति— दुर्जना: सज्जनं तिरस्कुर्वन्ति।

**उत्तरम्—**

(क) विचारयित्वा एव कार्यं क्रियताम्।

(ख) गोदावरीतीरे विशालशाल्मलीवृक्षे पक्षिण: निवसति स्म।

(ग) नायक: आह अति उत्तम: तव विचार:।

(घ) मम मित्रं हिरण्यक: युष्माकं बंधनं छेत्स्यति।

(ङ) किम् अस्माभि: सह न सम्भाषसे?

(च) हिरण्यक: अब्रवीत्—"आ:! पुण्यवान् अस्मि, मम प्रिय सुहृत् चित्रग्रीव: समायात:।"

(छ) मित्रस्य स्वरं श्रुत्वा स: उपसर्पति।

(ज) स: शीघ्रं एव स्वकार्ये युज्यते।

**2. अनया कथया वयं स्वजीवने कां शिक्षां स्वीकर्तुं शक्नुमः इति अधिकृत्य कक्षायां परिचर्चां कुर्वन्तु।**

**उत्तरम्—** छात्रा: स्वमित्रै: सह कक्षायां परिचर्चां कुर्वन्तु।

# अतिरिक्त अभ्यासः

**1. उचितम् उत्तरं चित्वा क्रमाक्षरं लिखत—**

(i) मित्राणां नायक: क: अस्ति?

(अ) सुरेश: (ब) दिनेश:

(स) सुधीर: (द) कपिल:

(ii) सेतु: केन कारणेन भग्न:?

(अ) तीव्रजलवेगेन (ब) झंझावातेन

(स) भूकम्पनेन (द) विस्फोटेन

(iii) पर्वतस्खलनं कुत्र अभवत्?

(अ) बदरिका आश्रमे (ब) केदारनाथे

(स) अमरनाथे (द) श्रीनाथे

(iv) सहसा सर्वत्र अन्धकार: कुत्र प्रसृत:?

(अ) देहरादूने (ब) प्रयागे

(स) केदारनाथे (द) बदरीनाथे

(v) मित्राणि प्रथमं कुत्र प्राप्तवन्त:?

(अ) गौरीशंकरशिखरे (ब) गौरीकुण्डे

(स) वशिष्ठकुण्डे (द) हीराकुण्डे

**उत्तरम्—** (i) (स), (ii) (अ), (iii) (ब), (iv) (स), (v) (ब)।

**2. समुचितपदेन रिक्तस्थानं पूरयत—**

(क) अस्मिन् ................ वयं धैर्यं धारयेम्।

(ख) अस्माकम् ................ एव सन्निकटे।

(ग) एवं चेत् कथं ................ चिन्तनीय।

(घ) मित्र! ................ मा कुरु।

(ङ) मार्गं निर्माय पुन: ................ प्रति गमिष्याम:।

**उत्तरम्—** (क) विपत्काले, (ख) मृत्यु:, (ग) उपाय:, (घ) विषादम् (ङ) स्वलक्ष्यं।

**3. सत्यम् असत्यं वा चिनुत—**

(क) सम्भूय सेतु मार्गं च निर्माण पुन: स्वलक्ष्यं प्रति गमिष्याम:। ( )

(ख) धैर्यम् अवलम्ब्य उपायं चिन्तनीयम्। ( )

(ग) नूनं न सम्भवति मित्र। ( )

(घ) अविचारितं कर्म कर्त्तव्यम्। ( )

(ङ) विपत्काले अस्माभिः अस्य तिरस्कारं कर्त्तव्यम्। ( )

**उत्तरम्—** (क) सत्यम्, (ख) सत्यम्, (ग) असत्यम्, (घ) असत्यम्, (ङ) असत्यम्।

**4. समुचितं मेलनं कुरुत—**

| | |
|---|---|
| (क) विपदि | अभिरुचि |
| (ख) अभ्युदये | विक्रमः |
| (ग) सदसि | धैर्यम् |
| (घ) युधि | वाक्पटुता |
| (ङ) यशसि | क्षमा |

**उत्तरम्—**

| | |
|---|---|
| (क) विपदि | धैर्यम् |
| (ख) अभ्युदये | क्षमा |
| (ग) सदसि | वाक्पटुता |
| (घ) युधि | विक्रमः |
| (ङ) यशसि | अभिरुचि |

**5. एकपदेन उत्तरत—**

(क) धैर्यम् कदा धारयेत्?

**उत्तरम्—** विपदि काले।

(ख) क्षमा कदा शोभते?

**उत्तरम्—** अभ्युदये।

(ग) युधि किं दर्शनीयम्?

**उत्तरम्—** विक्रमः ।

(घ) विपत्काले किं करणीयम्?

**उत्तरम्—** उपायश्चिन्तनीयः।

(ङ) अभिरुचि कुत्र भवेत्?

**उत्तरम्—** यशसि।

**6. पूर्णवाक्येन उत्तरत—**

(क) वृद्धानां वचनं कदा ग्राह्यम्?

**उत्तरम्—** वृद्धानां वचनम् आपत्काले उपस्थिते ग्राह्यम्।

(ख) तण्डुलकणान् अवलोक्य चित्रग्रीवस्य का आशङ्का आसीत्?

**उत्तरम्—** कश्चित् व्याधोऽत्र भवेत्।

(ग) चित्रग्रीवः व्याधस्य उपस्थिति कथं अनुमानितवान्?

**उत्तरम्—** सोऽचिन्तयत् कुतोऽत्र निर्जन वने तण्डुलकणानां सम्भवः। अतः अत्र कश्चित् व्याधः भवेत्।

(घ) कापुरुषस्य किं लक्षणम्?

**उत्तरम्—** विपत्काले विस्मय एव कापुरुषस्य लक्षणम्।

**7. अधोलिखित प्रश्नान् उत्तरत—**

(क) महात्मनां किं प्रकृतिसिद्धम्?

**उत्तरम्—** विपदि धैर्यम्, अभ्युदये क्षमाशीलता, सभायां सदसि वा वाक्चातुर्य, संग्रामे पराक्रमः, यशसि अभिरुचिः वेदाध्यने व्यसनं एतद् सर्वं महात्मनाम् स्वभावेन सिद्धं भवति।

(ख) वृद्धानां वचनं पालनीयं न वा?

**उत्तरम्—** आपत्काले उपस्थिते वृद्धानां वचनं ग्राह्यं भवति परन्तु सर्वत्र एव विचारे कृते तु भोजनस्यापि अभावः भवितुं शक्नोति।

# 3 सुभाषितरसं पीत्वा जीवनं सफलं कुरु

**1. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत—**

(क) गीतानि के गायन्ति?

(ख) कः बलं न वेत्ति?

(ग) कः वसन्तस्य गुणं वेत्ति?

(घ) मूषकः कस्य बलं न वेत्ति?

(ङ) फलोद्गमैः के नम्राः भवन्ति?

(च) केन समं सख्यं न करणीयम्?

(छ) केन विना दैवं न सिध्यति?

**उत्तरम्—** (क) देवाः (ख) निर्बलः (ग) पिकः (घ) सिंहस्य (ङ) तरवः (च) दुर्जनेन (छ) पुरुषकारेण।

**2. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

(क) तरवः कदा नम्राः भवन्ति?

**उत्तरम्—** फलोद्गमैः तरवः नम्राः भवन्ति।

(ख) समृद्धिभिः के अनुद्धताः भवन्ति?

**उत्तरम्—** सत्पुरुषाः समृद्धिभिः अनुद्धताः भवन्ति।

(ग) सत्पुरुषाणां स्वभावः कीदृशः भवति?

**उत्तरम्—** सत्पुरुषाणां स्वभावः विनम्रः भवति।

(घ) सत्यम् कदा सत्यम् न भवति?

**उत्तरम्—** सत्यं न यद्यच्छलमभ्युपैति।

(ङ) दैवं कदा न सिध्यति?

**उत्तरम्—** पुरुषकारणे विना दैवं न सिध्यति।

**3.** स्तम्भयोः मेलनं कुरुत—

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| गायन्ति देवाः किल गीतकानि | सत्पुरुषाणां स्वाभाविकी नम्रता |
| गुणी गुणं वेत्ति | सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |
| भवन्ति नम्राः तरवः फलोदगमैः | भारतभूमेः माहात्म्यवर्णनम् |
| यथा चतुर्भिः कनकं परीक्ष्यते | सज्जनः एव गुणानां मर्मज्ञः |
| अष्टौ गुणाः पुरुषं दीपयन्ति | प्रज्ञा, दमः, दानं, कृतज्ञता इत्यादयः |
| दुर्जनेन समं सख्यं न कारयेत् | केवलं दैवं प्रयत्नं विना असिद्धम् |
| एकेन चक्रेण न रथस्य गतिः | दुष्टसङ्गः उष्णाङ्गारसदृशः |

**उत्तरम्—**

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| गायन्ति देवाः किल गीतकानि | भारतभूमेः माहात्म्यवर्णनम् |
| गुणी गुणं वेत्ति | सज्जनः एव गुणानां मर्मज्ञः |
| भवन्ति नम्राः तरवः फलोदगमैः | सत्पुरुषाणां स्वाभाविकी नम्रता |
| यथा चतुर्भिः कनकं परीक्ष्यते | सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |
| अष्टौ गुणाः पुरुषं दीपयन्ति | प्रज्ञा, दमः, दानं, कृतज्ञता इत्यादयः |
| दुर्जनेन समं सख्यं न कारयेत् | दुष्टसङ्गः उष्णाङ्गारसदृशः |
| एकेन चक्रेण न रथस्य गतिः | केवलं दैवं प्रयत्नं विना असिद्धम् |

**4. अधः प्रदत्तमञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत—**

फलोद्गमैः, गुणं, कृतज्ञता, सिध्यति, श्रुतम्, शीलेन

(क) गुणी ................................ वेत्ति न वेत्ति निर्गुणः।

(ख) भवन्ति नम्राः तरवः ...............................।

(ग) पुरुषः परीक्ष्यते कुलेन, ......................., गुणेन, कर्मणा।

(घ) गुणाः पुरुषं दीपयन्ति—प्रज्ञा, कौल्यं, दमः, ..... ............।

(ङ) दानं यथाशक्ति ...................... च।

(च) एवं पुरुषकारेण विना दैवं न ..................।

**उत्तरम्—** (क) गुणं (ख) फलोद्गमैः (ग) शीलेन (घ) श्रुतं (ङ) कृतज्ञता (च) सिध्यति।

**5. समुचितं विकल्पं चिनुत—**

(क) ''गायन्ति देवाः किल गीतकानि''—इत्यस्य श्लोकस्य मुख्यविषयः कः?

(i) वसन्तस्य सौन्दर्यम्

(ii) भारतभूमेः गौरवम्

(iii) कर्मणां फलम्

(iv) दानस्य प्रभावः

(ख) ''गुणी गुणं वेत्ति''—इत्यत्र कः गुणं न जानाति?

(i) गुणी (ii) निर्गुणः

(iii) पिकः (iv) बली

(ग) ''पिको वसन्तस्य गुणं न वायसः''— इत्यस्य तात्पर्यं किम्?

(i) पिकः मधुरं गायति न वायसः

(ii) सुजन एव गुणं जानाति

(iii) वायसः अपि सरसं गानं करोति

(iv) वसन्तः निर्गुणः अस्ति

(घ) ''भवन्ति नम्राः तरवः फलोद्‌गमैः''—इत्यस्य अर्थः कः?

(i) वृक्षाणां कठोरता

(ii) सत्पुरुषाणाम् उन्नतिः

(iii) फलयुक्ताः वृक्षाः नम्राः भवन्ति

(iv) परोपकारिणां दुर्बलता

(ङ) ''न सा सभा यत्र न सन्ति वृद्धाः'' —इत्यत्र सभायाः महत्त्वं किम्?

(i) सभा मनोरञ्जनाय भवति

(ii) सभा धनसम्पत्तिं प्रदातुं शक्नोति

(iii) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः

(iv) सभा केवलं राजकार्यार्थं भवति

(च) दुर्जनेन सह सख्यं किमर्थं न कार्यम्?

(i) सः मित्रं भवति

(ii) सः धनं ददाति

(iii) सः शिक्षां ददाति

(iv) सः उष्णाङ्गारवद् हानिकरः भवति

**उत्तरम्**— (क) (ii), (ख) (ii), (ग) (i), (घ) (iii), (ङ) (iii), (च) (iv)।

# परियोजनाकार्यम्

**१. अन्तर्जालात् पुस्तकेभ्यश्च विंशतिसुभाषितानां सङ्ग्रहं कुरुत।**

**उत्तरम्**— 1. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

2. निमित्तमुद्दिष्य हि यः प्रकुप्यति, ध्रुवं स तस्यापगमे प्रसीदति।
अकारण द्वेषी मनस्तु यस्य वै, कथं जनस्तं यदि तोषयिष्यति॥

3. उदीरितोऽर्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति वोधिताः।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गित ज्ञानफला हि बुद्धयः॥

4. क्रोधोहि शत्रुः प्रथमो नराणां, देहस्थितो देह विनाशनायः।
यथास्थितः काष्ठगतो हि व्याह्नि स एव बाह्निर्दहवे शरीरम्॥

5. मृगाः मृगैः सङ्गमनुब्रजन्ति, गावश्च गोभिः तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः, समानशीलव्यसनेषु सख्यम्॥

6. सेवितव्यो महावृक्षः, फलच्छाया समन्वितः।
यदि दैवात् फलं नास्ति, छाया केन निवार्यते॥

7. अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति, योजकस्तत्र दुर्लभः॥

8. सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सवितारक्तः, रक्तश्चास्तमये तथा॥

9. विचित्रेखलु संसारे, नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः, भारस्य वहने स्वरः॥

10. उद्यमेन हि सिद्‌ध्यन्ति कार्याणि न मनोरथैः।
सुप्तस्य सिंहस्य न प्रविशन्ति मुखे मृगाः॥

11. अवक्रता यथा चित्ते, तथा वाचि भवेत् यदि।
तदेवाहुः महात्मानः समत्वमिति तत्वतः॥

12. त्यक्तवा धर्मप्रदां वाचं, परुषां योऽभ्युदीदरयत्।
परित्यज्यं फलं पक्वं, भुङ्‌क्तेऽपक्वं विमूढधी॥

13. विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां बदने ये तु ते चक्षुनाम्नी मते॥

14. यत् प्रोक्तं येन केनापि, तस्य ततवार्थ निर्णयः।
कर्तुं शक्यो भवेद्येन, स विवेक इतीरितः॥

15. धैर्यवान् मन्त्री सभायामष्यकातरः।
स केनापि प्रकारेण, परैर्न परिभूयते॥

16. यः इच्छति आत्मनः श्रेयः, प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च॥

17. अष्टादश पुराणेषु, व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय, पापाय परपीडनम्॥

18. नाहं कामये राज्यं, न चायुनर्भवम्।
कामये दुःख तप्तानां, दुःख विनाशनम्॥

19. सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुख भागभवेतु॥

20. आचारः प्रथमो धर्मः, इत्येतव् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं, प्राणेभ्योऽपि विशेषतः॥

**२. किमपि नीतिवाक्यम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।**

**उत्तरम्—** परोपकारः पुण्यायः इति विषये पञ्चवाक्यानि—

1. वृक्षाः परोपकाराय एव फलन्ति।
2. नद्यः परोपकाराय बहन्ति।
3. वारिदाः परोपकाराय वर्षन्ति।
4. गावः परोपकाराय दुहन्ति।
5. अतः मानवेनापि परोपकारः एव कर्त्तव्य।

**३. पाठे आगतानि सुभाषितानि कण्ठस्थीकृत्य कक्षायां श्रावयत।**

**उत्तरम्—** छात्राः अध्यापकानां संरक्षणे स्वयमेव श्रावयन्तु।

# अतिरिक्त अभ्यासः

**1. समुचितं विकल्पं चित्वा क्रमाक्षरं लिखत—**

(i) सुभाषितानि इति पदस्य अभिप्रायः?
(अ) सु + भाषित (ब) सुभ + आसित
(स) सुभा + सित (द) सुभा + आसित

(ii) कीदृशाः श्लोकाः सुभाषितानि कथ्यन्ते?
(अ) धार्मिक श्लोकाः (ब) स्तुतिपरक श्लोकाः
(स) नीतिश्लोकाः (द) प्रहेलिकाः

(iii) सुभाषितानि जीवने किं कुर्वन्ति?
(अ) मार्गदर्शनम् (ब) कर्त्तव्यं बोधयन्ति
(स) सन्मति ददाति (द) एते सर्वे

(iv) देवाः भारतं प्रति किं कुर्वन्ति?
(अ) गीतानि गायन्ति (ब) प्रार्थयन्ति
(स) स्निह्यन्ति (द) भर्त्स्यन्ति

**उत्तरम्—** (i) (अ), (ii) (स), (iii) (द), (iv) (अ)।

**2. समुचित पदेन रिक्तस्थानानि पूरयत।**

(क) गायन्ति देवाः किल................।
(ख) देवाः ................ पुरुषाः भवन्ति।
(ग) ................ गुणं न जानाति।
(घ) ................ वसन्तस्य गुणं जानाति।

**उत्तरम्—** (क) गीतकानि (ख) सुरत्वात् (ग) निर्गुणः (घ) पिकः।

**3. सत्यम् असत्यं वा चिनुत।**

(क) धन्यास्तु ते भारत भूमि भागे। ( )
(ख) बली बलं न वेत्ति। ( )
(ग) वायसः वसन्तस्य गुणं जानाति। ( )
(घ) भवन्ति तरवः फलागमे विनम्रः। ( )
(ङ) सत्पुरुषाः समृद्धिभिः उद्धताः भवन्ति। ( )

**उत्तरम्—** (क) सत्यम्, (ख) असत्यम्, (ग) असत्यम्, (घ) सत्यम्, (ङ) असत्यम्।

**4. समुचित मेलनं कुरुत—**

| | |
|---|---|
| (क) धन्याः | उद्धता |
| (ख) स्वर्ग | निर्गुणः |
| (ग) गुणी | निर्बलः |
| (घ) बली | अधन्याः |
| (ङ) अनुद्धता | निरय |

**उत्तरम्—**

| | |
|---|---|
| (क) धन्याः | अधन्याः |
| (ख) स्वर्ग | निरय |
| (ग) गुणी | निर्गुणः |
| (घ) बली | निर्बलः |
| (ङ) अनुद्धता | उद्धता |

**5. एकपदेन उत्तरत—**

(क) समृद्धिभिः सत्पुरुषाः कीदृशाः भवन्ति?

**उत्तरम्—** अनुद्धतम्।।

(ख) कनक इव मनुष्य कैः उपायैः परीक्ष्यते।

**उत्तरम्—** चतुर्भिः उपायैः।

(ग) सत्यपूतं किं भवेत्?

**उत्तरम्—** धर्मः।

(घ) कीदृशः जनः अविश्वसनीयः भवति?

**उत्तरम्—** दुर्जनः।

(ङ) सुभाषितानि पदस्य पर्याय अस्ति?

**उत्तरम्—** शोभनानि वचनानि।

**6.** पूर्णवाक्येन उत्तरत—

(क) रथस्य गतिः कैः चक्रैः भवति?

**उत्तरम्—** रथस्य गतिः चक्रद्वयेन एव सम्यक् भवति।

(ख) विद्यया अलंकृतोऽपि कः परिहर्तव्यः?

**उत्तरम्—** विद्यया अलङ्कृतोऽपि दुर्जनः परिहर्तव्यः।

(ग) सभासदाः कीदृशाः भवेयुः?

**उत्तरम्—** सभासदाः निश्छलः सत्यधर्मेणयुताः भवेयुः।

(घ) के गुणाः पुरुषं दीपयन्ति?

**उत्तरम्—** प्रज्ञा, कौल्यं, दमः, श्रुतं, पराक्रमः, मितभाषणं, दानं कृतज्ञता च एते अष्टौ गुणाः पुरुषं दीपयन्ति।

**7.** अधोलिखित प्रश्नान् अपि उत्तरत।

(क) सभायां कीदृशाः मनुष्याः भवेयुः?

**उत्तरम्—** छलविहीनसत्येनोपेतेन धर्मेवृद्धाः जनाः सभायां सदसि वा भवेयु।

(ख) 'यथा ह्येकेन—' इति श्लोकस्य केन्द्रीयं भावं लिखत।

**उत्तरम्—** यथा एकेन चक्रेण रथम् चलति तयैव तथव मनुष्य अपि मात्र भाग्येन न जीवनं चालयितुं शक्नोति।

# 4 प्रणम्यो देशभक्तेऽयं गोपबन्धुर्महामनाः

**1. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत—**

(क) समाज-दिनपत्रिकायाः प्रतिष्ठाता कः?

(ख) गोपबन्धुः कस्मै स्वभोजनं दत्तवान्?

(ग) मरणासन्नः कः आसीत्?

(घ) गोपबन्धुः केन उपाधिना सम्मानितः अभवत्?

(ङ) गोपबन्धुः कति वर्षाणि कारावासं प्राप्तवान्?

**उत्तरम्—** (क) गोपबन्धुः। (ख) भिक्षुकाय। (ग) गोपबन्धोः पुत्रः। (घ) उत्कलमणिना। (ङ) वर्षद्वयम्।

**2. एकवाक्येन उत्तरं लिखत—**

(क) गोपबन्धुः किमर्थम् अश्रुपूर्णनयनः अभवत्?

**उत्तरम्—** करुणध्वनिं श्रुत्वा सः अश्रुपूर्णनयनः अभवत्।

(ख) कीदृशं पुत्रं विहाय गोपबन्धुः समाजसेवाम् अकरोत्?

**उत्तरम्—** मरणासन्नं पुत्रं विहाय गोपबन्धुः समाजसेवाम् अकरोत्।

(ग) गोपबन्धोः कृते उत्कलमणिः इति उपाधिः किमर्थं प्रदत्तः?

**उत्तरम्—** गोपबन्धोः कृते 'उत्कलमणिः' इति उपाधिः तस्य असीमं त्यागमनुभवन् वैज्ञानिकः आचार्यः प्रफुल्लचन्द्ररायः गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।

(घ) गोपबन्धुः कुत्र जन्म लब्धवान्?

**उत्तरम्—** गोपबन्धुः ओडिशाराज्यस्य पुरीजनपदस्य साक्षीगोपालसमीपे सुआण्डो ग्रामे जन्म लब्धवान्।

(ङ) गोपबन्धुः सर्वदा केषाम् उपयोगं कृतवान्?

**उत्तरम्—** गोपबन्धुः सदैव स्वदेशीवस्त्राणां वस्तूनां च प्रयोगं कृतवान्।

**3. कोष्ठके दत्तानि पदानि उपयुज्य वाक्यानि रचयत—**

| सेवाम्, सुस्वादूनि, सहायताम्, स्वदेशवस्त्राणि, अन्यतमः |
|---|

**उत्तरम्—**

(क) सेवाम्— सः वृद्धानां सेवाम् करोति।

(ख) सुस्वादूनि— तत्र सुस्वादूनि व्यञ्जनानि परिवेषितानि।

(ग) सहायताम्— रमेशः निर्धनानां सहायतां करोति।

(घ) स्वदेशवस्त्राणि— गोपबन्धुः स्वदेशवस्त्राणि एव परिदधाति।

(ङ) अन्यतमः— शत्रुघ्नः भ्रातृषु अन्यतमः आसीत्।

**4. चित्रं दृष्ट्वा पञ्चवाक्यानि रचयत—**



**उत्तरम्—** (क) चित्रे गोपबन्धुदासः अस्ति।

(ख) सः अतिचिन्तितः अस्ति।

(ग) पार्श्वे तस्य रुग्णः जनः अस्ति।

(घ) जनः मरणासन्नः अस्ति।

(ङ) सः सदैव समाज सेवां करोति।

**5. समुचितेन पदेन श्लोकं पूरयत—**

(क) ............................ मम लीयतां तनुः।

(ख) उत्कलमणिरित्याख्यः प्रसिद्धो ............................

(ग) स्वदेशलोकास्तदनु ............................ नु

(घ) स्वराज्यमार्गे यदि ............................,

(ङ) ............................ परिपूरितास्तु सा

**उत्तरम्—** (क) स्वदेशभूमौ। (ख) लोकसेवकः। (ग) प्रयान्तु। (घ) गर्तमालिका (ङ) ममास्थिमांसैः।

**6. उदाहरणानुसारं क्रियापदं स्त्रीलिङ्गे परिवर्तयत—**

यथा— गतवान् — गतवती

(क) प्राप्तवान् —

(ख) उपविष्टवान् —

(ग) भुक्तवान् —

(घ) कृतवान् —

(ङ) गृहीतवान् —

**उत्तरम्—**

(क) प्राप्तवान् — प्राप्तवती

(ख) उपविष्टवान् — उपविष्टवती

(ग) भुक्तवान् — भुक्तवती

(घ) कृतवान् — कृतवती

(ङ) गृहीतवान् — गृहीतवती

**7. समुचितेन पदेन सह स्तम्भौ मेलयत—**

| अ | इ |
|---|---|
| 1. समाजः | गोपबन्धुः |
| 2. ममास्थिमांसैः | व्यञ्जनानि |
| 3. उत्कलमणिः | क्रन्दनध्वनिः |
| 4. आँ आँ . . इति | दिनपत्रिका |
| 5. सुस्वादूनि | परिपूरितास्तु |

**उत्तरम्—**

| अ | इ |
|---|---|
| 1. समाजः | दिनपत्रिका |
| 2. ममास्थिमांसैः | परिपूरितास्तु |
| 3. उत्कलमणिः | गोपबन्धुः |
| 4. आँ आँ . . इति | क्रन्दनध्वनिः |
| 5. सुस्वादूनि | व्यञ्जनानि |

**8.** घटनाक्रमेण वाक्यानि पुनः लिखत—

(क) भिक्षुकञ्च तद्भोजितवान्।

(ख) प्रफुल्लचन्द्रराय: गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।

(ग) गोपबन्धुः अश्रुपूर्णनयनोऽभवत्।

(घ) अतिथयो हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः।

(ङ) दिनत्रयात् किमपि न भुक्तम्।

**उत्तरम्—**

(क) अतिथयो हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः।

(ख) दिनत्रयात् किमपि न भुक्तम्।

(ग) गोपबन्धुः अश्रुपूर्णनयनोऽभवत्।

(घ) भिक्षुकञ्च तद्भोजितवान्।

(ङ) प्रफुल्लचन्द्रराय: गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।

## परियोजनाकार्यम्

१. स्वप्रदेशस्य स्वतन्त्रतासङ्ग्रामिणां नामानि सङ्गृह्य तेषु एकस्य सचित्रां संक्षिप्तजीवनीं लिखत।

**उत्तरम्—** 1. सौवरमल्लः गोपा 2. बाबू राजबहादुरः 3. ठा. देशराजः 4. हरिभाउ उपाध्यायः 5. हीरालाल शास्त्री 6. पं. ताडकेश्वर शर्मा, 7. रमेश स्वामी 8. स्वामि केशवानन्दः 9. गोकुल वर्मा, 10. शोभारामः 11. मा. भोलारामः 12. मात्र आदित्येन्द्रः।

ठा. देशराज भरतपुर-जनपदे जघीना ग्रामस्यः वास्तव्यः आसीत्। सः आङ्ग्लशासनं प्रति विरोधमकरोत्। प्रजामण्डलं नाम संस्थां संयोज्य आङ्ग्लान् प्रति विरोधं प्रदर्शितम्। सः नैकवारं जेलयात्राम् अकरोत्? आङ्ग्लसर्वकारः इमं घातकंज्ञात्वा भरतपुरतः बहिर् गन्तुम् आदिष्टवान्। अनझन् जलपदस्ते बड़ी पचेरी नान्मि ग्रामे पं. ताङकेश्वर शर्मण ग्रहे अतिष्ठत्। सोऽपि सप्तन्त्र्य पथरूप अनुयायी आसीत्। अतः झुनुझुन् सीकर-क्षेत्रं अस्य कार्यक्षेत्रम् आसीत्। तव कृषकान् आगयत्। तान् आंदोलने सम्मिलितं कृतवान्। सः भारते स्वाधीनै एव शान्तोऽभवत्।

**२. जलप्लावपीडितानां साहाय्यार्थं स्वकीयाम् एकां कार्ययोजनां लिखत।**

**उत्तरम्—** सबसे पहले बाढ़ पीड़ितों की सुरक्षा के लिए एक बाल सेना बनाएँगे तथा बड़ों की सहायता से उन्हें सुरक्षित स्थान पर पहुँचाएँगे जहाँ पर बाढ़ का पानी न पहुँचे। तत्पश्चात् घर-घर जाकर भोजन एकत्रित करके उन तक पहुँचाएँगे। वस्त्र-दान करने के लिए लोगों को प्रोत्साहित एवं प्रेरित करेंगे तथा वस्त्रों को उन तक पहुँचाएँगे। विभिन्न संस्थाओं से सम्पर्क करके उन्हें आवश्यक सामान दिलाएँगे जिससे कि अपने आसरे के लिए दिन व्यतीत कर सके। बच्चों के लिए जिनकी कि पुस्तकें नष्ट हो गई हैं उन्हें पुस्तकों का प्रबन्ध करेंगे तथा विद्यालय जाने के लिए प्रेरित करेंगे। उनकी आवश्यक एवं आये दिन की जरूरतों को पूरा करेंगे।

# अतिरिक्त अभ्यासः

**1. उचितं उत्तरं चित्वा क्रमाक्षरं लिखत।**

(i) किं श्रुत्वा अध्यापकाः हसितवन्तः?
(अ) श्लोकम् (ब) कथां
(स) प्रहसनम् (द) हास्यकणिकान्

(ii) किं श्रुत्वा गोपबन्धुः बहिर् अगच्छत्?
(अ) गीतम् (ब) करुणध्वनिम्
(स) वाद्यवादनम् (द) नृत्यम्

(iii) दिनत्रयात् भोजनं केन न भुक्तम्?
(अ) गोपबन्धुः (ब) हरिहरदासः
(स) भिक्षुकः (द) माता

(iv) स्वस्मै परिवेषितं भोजनं हस्तेगृहीत्वा कः बहिर् अगच्छत्?
(अ) गोपबन्धुः (ब) देशबन्धुः
(स) दीनबन्धुः (द) वंगबन्धुः

(v) 'मा शरीरे दयां कुरु' इति कोऽवदत्?
(अ) प्रफुल्लचन्द्रः (ब) हरिहरदासः
(स) गोपबन्धुः (द) देशबन्धुः

**उत्तरम्—** (i) (अ), (ii) (ब), (iii) (स), (iv) (अ), (v) (स)।

**2. उचितपदेन रिक्तस्थानानि पूरयत—**

(क) किञ्चिद् भोजनं ................।
(ख) एतच्छ्रुत्वा सर्वे ................ हसितवन्तः।
(ग) बहिः ................ करुणध्वनिः अगुञ्जत्।
(घ) सर्वे ................ हस्तपादं क्षालितवन्ता।
(ङ) ................ व्यञ्जनानि परिवेषितानि।

**उत्तरम्—** (क) देहि (ख) उच्चैः (ग) कश्चन (घ) अतिथयः (ङ) सुस्वादूनि।

**3. सत्यम् असत्यं वा चिनुत—**

(क) जीवनार्थं भोजनं कुर्याः। ( )
(ख) शरीरे दयां कुरु। ( )
(ग) परिवेषितं भोजनं देशबन्धुः अखादत। ( )
(घ) व्यञ्जनानि पात्रेषु परिवेषितानि। ( )
(ङ) दिनत्रयात् प्रभूतं भोजनं कृतम्। ( )

**उत्तरम्—** (क) सत्यम्, (ख) सत्यम्, (ग) असत्यम्, (घ) असत्यम्, (ङ) असत्यम्।

**4. समुचित मेलनं कुरुत—**

| (क) | (ख) |
|---|---|
| (क) सत्यवादी | अन्यस्मै |
| (ख) हसन् | नीचैः |
| (ग) सुखम् | मिथ्याचारी |
| (घ) उच्चैः | दुःखम् |
| (ङ) स्वस्मै | रुदन् |

**उत्तरम्—**

| (क) | (ख) |
|---|---|
| (क) सत्यवादी | मिथ्याचारी |
| (ख) हसन् | रुदन् |
| (ग) सुखम् | दुःखम् |
| (घ) उच्चैः | नीचैः |
| (ङ) स्वस्मै | अन्यस्मै |

**5. एकपदेन उत्तरत—**

(क) भिक्षुकः किं निवेदयति स्म?

**उत्तरम्—** भोजनं देहि (भोजन दो)।

(ख) भिक्षुकः कथं क्रन्दति स्म?

**उत्तरम्—** आँ, आँ.. इति।

(ग) क्रन्दनं श्रुत्वा कस्य अश्रुपूरितनयनोऽभवत्?

**उत्तरम्—** गोपबन्धोः।

(घ) 'उत्कलमणिः' इति उपाधिना कः सम्मानितः?

**उत्तरम्—** गोपबन्धुः।

(ङ) भोजनं किमर्थम् आवश्यकम्?

**उत्तरम्—** जीवनाय।

**6. पूर्णवाक्येन उत्तरत—**

(क) गोपबन्धोः कर्णयोः किम् अगुञ्जत्?

**उत्तरम्—** मातः मातः! बुभुक्षितोऽस्मि। कृपया किञ्चिद् भोजनं देहि दिनत्रयात् किमपि न भुक्तम्।

(ख) क्रन्दनं श्रुत्वा गोपबन्धुः किमकुर्वत्?

**उत्तरम्—** स्वस्मै परिवेषितं भोजनं हस्ते गृहीत्वा बहिरगच्छतु।

(ग) गोपबन्धुः भोजनं कस्मै अभोजयत्?

**उत्तरम्—** गोपबन्धुः भोजनं भिक्षुकं भोजितवान्।

(घ) गोपबन्धुः केषु अन्यतमः?

**उत्तरम्—** गोपबन्धुः प्रसिद्धेषु पञ्चमित्रेषु अन्यतमः आसीत्।

(ङ) सुआण्डो ग्रामः कस्मिन् जनपदे अस्ति?

**उत्तरम्—** सुआण्डो ग्रामः पुरी जनपदे अस्ति।

**7. एतान् प्रश्नान् अपि उत्तरत—**

(क) गोपबन्धुः ओडिआ भाषायां किं साहित्यं लिखितवान्?

**उत्तरम्—** गोपबन्धुः ओडिआ भाषाया 'बन्दीर आत्मकथा' 'कारा-कविता', 'धर्म पद' 'गो-माहात्म्य' 'नचिकेता-उपाख्यान' इत्यादीनि बहु प्रेरणादायीनि पुस्तकानि विरचितवान्।

(ख) समाजसेवायै गोपबन्धुः किम् अकरोत्?

**उत्तरम्—** मरणासन्नं स्वपुत्रमपि विहाय जलप्लावन पीडितान् भारत मातुः सहस्रशः पुत्रान् उद्धर्तुं गृहात् निर्गतः समाजम् असेवत् च। देशसेवा तत्परस्य गोपबन्धुवर्यस्य प्रसिद्धं प्रेरणादायकं वचनमधुनापि जनमानसेषु राष्ट्रभक्तिं जागरयति।

# 5 गीता सुगीता कर्त्तव्या

**1. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत—**

(क) श्रद्धावान् जनः किं लभते?

(ख) कस्मात् सम्मोहः जायते?

(ग) सम्मोहात् किं जायते?

(घ) अर्जुनाय गीतां कः उपदिष्टवान्?

(ङ) हर्षामर्षभयोद्वेगैः मुक्तः नरः कस्य प्रियः भवति?

**उत्तरम्—** (क) ज्ञानम्, (ख) क्रोधात्, (ग) स्मृतिविभ्रमः, (घ) श्रीकृष्णः, (ङ) भगवतः।

**2. पूर्णवाक्येन उत्तरं लिखत—**

(क) कीदृशं वाक्यं वाङ्मयं तपः उच्यते?

**उत्तरम्—** स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः उच्यते।

(ख) कीदृशः जनः स्थितधीः उच्यते?

**उत्तरम्—** दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः,

वीतराग-भय-क्रोध: मुनि: स्थितधी: इति उच्यते।

(ग) जन: कथं प्रणश्यति?

**उत्तरम्—** बुद्धिविनाशात् जन: प्रणश्यति?

(घ) जन: कथम् उत्तमां शान्तिं प्राप्नोति?

**उत्तरम्—** जन: ज्ञानंलब्ध्वा अचिरेण एव परां शान्तिम् अधिगच्छति।

(ङ) उपदेशप्राप्तये त्रय: उपाया: के भवन्ति?

**उत्तरम्—** उपदेशप्राप्तये प्रणिपातं, परिप्रश्नं सेवा च त्रय: उपाया: भवन्ति।

**3. कोष्ठके दत्तानि पदानि उपयुज्य वाक्यानि रचयत—**

| सेवया, स्मृतिविभ्रम:, योगी, वाङ्गमयं, स्थितधी: |
|---|

(क) अनुद्वेगकरं सत्यं प्रियहितं च वाक्यं ... तप: उच्यते।

(ख) सततं सन्तुष्ट: दृढनिश्चय: च ............... भवति।

(ग) अनुद्विग्नमना: मुनि: ......................... उच्यते।

(घ) तद् आत्मज्ञानं प्रणिपातेन परिप्रश्नेन ...... च विद्धि।

(ङ) सम्मोहात् ........................... भवति।

**उत्तरम्—** (क) वाङ्गमयं, (ख) योगी, (ग) स्थितधी:, (घ) सेवया, (ङ) स्मृतिविभ्रम:।

**4. अधोलिखितानि पदानि उपयुज्य वाक्यानि रचयत—**

(क) उच्यते — ........................................

(ख) च — ........................................

(ग) न — ........................................

(घ) लब्ध्वा — ........................................

(ङ) कुर्यात् — ........................................

**उत्तरम्—**

(क) उच्यते — वेदं य: पाठयति स: आचार्य: उच्यते।

(ख) च — राम: लक्ष्मण: सीता च वनं गच्छन्ति।

(ग) न — न अहं जानामि।

(घ) लब्ध्वा — प्रमाणपत्रं लब्ध्वा स: प्रसन्नोऽभवत्।

(ङ) कुर्यात् — सत्कार्यमेव कुर्यात् सदा।

**5. पाठानुसारं समुचितेन पदेन श्लोकं पूरयत—**

(क) श्रद्धावाँल्लभते ज्ञानं तत्पर: ..................।

(ख) .................. चैव वाङ्मयं तप उच्यते।

(ग) सन्तुष्ट: सततं योगी यतात्मा ..................।

(घ) ............... भवति सम्मोह: सम्मोहात्स्मृतिविभ्रम:।

(ङ) तद्विद्धि .................. परिप्रश्नेन सेवया।

**उत्तरम्—** (क) संयतेन्द्रिय:, (ख) स्वाध्यायाभ्यसनं, (ग) दृढ़निश्चय: (घ) क्रोधाद्, (ङ) प्रणिपातेन।

**6. उदाहरणानुसारं पदानि स्त्रीलिङ्गे परिवर्तयत—**

उदाहरणम्—

श्रद्धावान् ..........श्रद्धावती ..........

बुद्धिमान् ..........बुद्धिमती ..........

**उत्तरम्—** (क) गुणवान् — गुणवती

(ख) आयुष्मान् — आयुष्मती

(ग) क्षमावान् — क्षमावती

(घ) ज्ञानवान् — ज्ञानवती

(ङ) श्रीमान् — श्रीमती

**7. समुचितेन पदेन सह स्तम्भौ मेलयत्—**

| | अ | इ |
|---|---|---|
| (क) | सर्वभूतानाम् | पुन: पुन: प्रश्नकरणेन |
| (ख) | अनुद्विग्नमना: | स्थिरमतिमान् |
| (ग) | स्थितधी: | इन्द्रियसंयमी |
| (घ) | परिप्रश्नेन | यस्य मन: विचलितं न भवति |
| (ङ) | संयतेन्द्रिय: | सर्वेषां प्राणिनाम् |

**उत्तरम्—**

| | अ | इ |
|---|---|---|
| (क) | सर्वभूतानाम् | सर्वेषां प्राणिनाम् |
| (ख) | अनुद्विग्नमना: | यस्य मन: विचलितं न भवति |
| (ग) | स्थितधी: | स्थिरमतिमान् |
| (घ) | परिप्रश्नेन | पुन: पुन: प्रश्नकरणेन |
| (ङ) | संयतेन्द्रिय: | इन्द्रियसंयमी |

**8. श्रीमद्भगवद्गीताया: विषये पञ्चवाक्यानि लिखत—**

**उत्तरम्—**

(क) श्रीकृष्णस्य अर्जुनाय दत्तं उपदेशानां संग्रहं गीता।

(ख) गीता महाभारतस्य भीष्मपर्वणि वर्णिता।

(ग) महर्षिवेदव्यास: अस्य रचयिता।

(घ) गीतायां अष्टादश: अध्याया: सन्ति।

(ङ) श्रीमद्भगवद्गीतायां सप्तशतं श्लोकाः सन्ति।

## परियोजनाकार्यम्

**१. कक्षायां श्रीमद्भगवद्गीतानुगुणं 'स्थितधीः' इति विषयम् अधिकृत्य 'मम जीवनलक्ष्यम्' इत्यस्मिन् विषये परिचर्चां स्थापयतु।**

**उत्तरम्—** छात्राः स्वशिक्षकैः सह परिचर्चां स्थापयन्तु।

**२. विविध-धर्माणां धर्मग्रन्थानां नामानि विलिख्य कस्यचित् एकस्य धर्मग्रन्थस्य विवरणं लिखत।**

**उत्तरम्—** 1. हिन्दूधर्मः — रामायणः। 2. इस्लामधर्मः — कुरानः। 3. सिखधर्मः — गुरुग्रंथसाहिबः। 4. बौद्धधर्मः — त्रिपिटकः। 5. ईसाईधर्मः — बाइबिलः। 6. यहूदीधर्मः — तोराहः।

- रामायणः रामायणमहाकाव्ये श्रीरामस्य चरित्रं वर्णितम् अस्ति। रचनाकारः महर्षिः वाल्मीकिः अस्ति। अयं ग्रन्थः सप्तकाण्डेषु विभक्तमस्ति। अस्मिन् महाकाव्ये मानवजीवनस्य विभिन्नपक्षस्य चित्रणं वर्तते। महर्षिवाल्मीकिः आदिकविः अस्ति।

# अतिरिक्त अभ्यासः

**1. समुचितं विकल्पं चित्वा क्रमाक्षरं लिखत—**

(i) पद्मनाभः कोऽस्ति?

(अ) ब्रह्मा (ब) विष्णु
(स) महेश (द) सर्वे

(ii) गीतायाम् कीदृशाः उपदेशाः?

(अ) प्रेरणाप्रदाः (ब) अमृततुल्याः
(स) गङ्गाजलमिव (द) सरसाः

(iii) अर्जुनः किमर्थम् उपदिष्टः कृष्णेन?

(अ) हिंसार्थम् (ब) युद्धार्थम्
(स) कर्त्तव्यपालनार्थम् (द) प्रतिशोधार्थम्

(iv) गीतायाः उपदेश पूर्वं अर्जुनः कीदृशः अभवत्?

(अ) युद्धरतः (ब) किंकर्त्तव्यविमूढः
(स) युद्धपराङ्मुख् (स) सामान्यः

**उत्तरम्—** (i) (ब), (ii) (ब), (iii) (स), (iv) (स)।

**2.** उचितपदेन रिक्तस्थानानि पूरयत—

(क) रमेशः अपि ............... सह तत्र गतवान्।

(ख) इदं ............... रमेशः पितरम् अपृच्छत्।

(ग) अर्जुनः युद्धं ............... नेच्छति स्म।

(घ) श्रीकृष्णस्य उपदेश एव ............... अस्ति।

(ङ) गीतायाम् ............... उपदेशाः सन्ति।

**उत्तरम्—** (क) स्वजनकेन, (ख) श्रुत्वा, (ग) कर्तुं, (घ) श्रीमद्भगवद्गीता, (ङ) अमृततुल्याः।

**3.** सत्यम् असत्यं वा चिनुत—

(क) कुरुक्षेत्रे श्रीगीता-जयन्तीः-महोत्सवः आचरितः। ( )

(ख) तत्र अल्पसंख्यकाः जनाः आगच्छन्। ( )

(ग) कलयुगे कुरुक्षेत्रे कौरवपाण्डवानां युद्धमभवत्। ( )

(घ) गीतायां सामान्याः उपदेशाः सन्ति। ( )

(ङ) युद्धस्तम् अर्जुनं श्रीकृष्णः उपदिष्टवान्। ( )

**उत्तरम्—** (क) सत्यम्, (ख) असत्यम्, (ग) असत्यम्, (घ) असत्यम्, (ङ) असत्यम्।

**4. विशेषणपदानि उचितेन विशेष्यपदेन सह मेलयत—**

| | विशेषण | विशेष्य |
|---|---|---|
| (क) | बहवः | वर्णेभ्यः |
| (ख) | बहुभ्यः | युद्धे |
| (ग) | तस्मिन् | उपदेशाः |
| (घ) | अमृततुल्याः | जनाः |
| (ङ) | अस्मिन् | पाठे |

**उत्तरम्—**

| | विशेषण | विशेष्य |
|---|---|---|
| (क) | बहवः | जनाः |
| (ख) | बहुभ्यः | वर्णेभ्यः |
| (ग) | तस्मिन् | युद्धे |
| (घ) | अमृततुल्याः | उपदेशाः |
| (ङ) | अस्मिन् | पाठे |

**5. एकपदेन उत्तरत—**

(क) 'सुगीता कथं कर्त्तव्या?' इति प्रश्नं कः पृच्छति?

**उत्तरम्—** रमेशः।

(ख) उत्तमभावेन का पठनीया? (उत्तम भाव से क्या पढ़नी चाहिए?)

**उत्तरम्—** श्रीमद्भगवद्गीता।

(ग) अस्मिन् पाठे श्लोका कुतः सङ्कलिताः?

**उत्तरम्—** श्रीमद्भगवद्गीतायाः।

(घ) स्थितधीः कान् त्यजति?

**उत्तरम्—** आसक्ति, भयं क्रोधं च।

(ङ) आपात् काले मनुष्यः किम् अनुभवति?

**उत्तरम्—** उद्वेगम्।

**6. पूर्णवाक्येन उत्तरत—**

(क) सुखेषु कीदृशः भवेत्?

**उत्तरम्—** सुखेषु विगतस्पृहः भवेत्।

(ख) रागादिभिः रहितः पुरुषः किम् उच्यते?

**उत्तरम्—** वीतराग-भय-क्रोधः मुनिः स्थितधीः इति उच्यते।

(ग) मानवविनाशस्य मूलकारणं किम्?

**उत्तरम्—** मानवविनाशस्य मूलकारणं क्रोधः।

(घ) मनुष्यः उद्विग्नमनः कदा भवति?

**उत्तरम्—** मनुष्यः दुःखेषु उद्विग्नमनः भवति।

**7. एतान् प्रश्नान् अपि उत्तरत—**

(क) गीता सुगीता कथं कर्त्तव्या?

**उत्तरम्—** अस्य आशयः अस्ति यत् श्रीमद्भगवद्गीतायाः अध्ययनम् अभ्यसनं च सम्यक् रूपेण करणीयः।

(ख) कः मनुष्यः स्थितप्रज्ञः भवति? (कौन मनुष्य स्थितप्रज्ञ होता है?)

**उत्तरम्—** यः मनुष्यः दुःखेषु उद्विग्नः न भवति सुखेषु न स्पृहयति रागात्, भयात्, क्रोधात् च रहितः भवति सः स्थितप्रज्ञः इति उच्यते।

# 6 डिजिभारतम्-युगपरिवर्तनम्

**1. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत—**

(क) प्रधानमन्त्रिसङ्ग्रहालये कीदृशी प्रौद्योगिकी प्रयुक्ता अस्ति?

(ख) हॉलोग्राम्-द्वारा कस्य भाषणं दृश्यते?

(ग) कस्याः प्रभावः दैनन्दिनजीवने दृश्यते?

(घ) भारत-सर्वकारस्य महत्त्वाकाङ्क्षिणी योजना का अस्ति?

(ङ) 'फास्टॅग्' इत्यस्य उपयोगेन कस्य सङ्ग्रहणं भवति?

**उत्तरम्—** (क) डिजिटल्-प्रौद्योगिकी। (ख) प्रधानमन्त्रिणः। (ग) डिजिटल्-योजनायाः। (घ) डिजिटल्-योजनायाः। (ङ) मार्गशुल्कस्य।

**2. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

(क) प्रधानमन्त्रिसङ्ग्रहालये काः डिजिटल्-प्रौद्योगिक्यः प्रदर्शिताः सन्ति?

**उत्तरम्—** अत्र वर्धिता वास्तविकता (AR) आभासीया वास्तविकता (VR) च सम्बद्धानि उपकरणानि अपि सन्ति। (यहाँ वर्धिता वास्तविकता और आभासी वास्तविकता, से सम्बंधित उपकरण भी हैं।)

(ख) जनाः किमर्थं साङ्गणिक-अपराधेन पीडिताः भवन्ति?

**उत्तरम्—** जनाः प्रायशः लोभात् भयात् वा साङ्गणिक-अपराधेन पीडिताः भवन्ति।

(ग) यशिका 'डिजि-लॉकर्' इत्यस्य उपयोगं कथं करोति?

**उत्तरम्—** तस्याः आधाकार्डं विद्यालयीप्रमाणपत्रं च तत्र सुरक्षिताः सन्तिः।

(घ) डिजिटल्-भारतस्य वित्तीयसमावेशने काः योजनाः सन्ति?

**उत्तरम्—** वित्तीयसमावेशनस्य क्षेत्रे यूपीआय्, रूपेकार्ड, जनधनयोजना, इत्यादीनि साधनानि सन्ति।

(ङ) डिजिटल्-भारते शिक्षायाः क्षेत्रे केषां पटलानाम् उपयोगः करणीयः?

**उत्तरम्—** शिक्षायाः क्षेत्रे दीक्षा, स्वयम्, स्वयंप्रभा, ई-पाठशाला, भारतीय-राष्ट्रीय-डिजिटल्-पुस्तकालयः, निष्ठा, पीएम् ई-विद्या, निःशुल्क- डिजिटल शैक्षणिकमञ्चः इत्यादीनाम् उपयोगः भवति।

(च) ग्राम्य-क्षेत्रेषु डिजिटल्-सेवानां समस्या कथं निराकर्तुं शक्यते?

**उत्तरम्—** सर्वकारः अन्तर्जालस्य उत्तरोत्तरं विस्तारयकार्यं करोति। अनेन ग्राम्य-क्षेत्रे अपि उच्चगतेः जालस्य

उपलब्धिः भविष्यति।

**3. अधः दत्तान् शब्दान् सम्यक् संयोजयत—**

| क्रमः | शब्दः | संयोजनीयः शब्दः |
|---|---|---|
| (क) | हॉलोग्राम् | कृत्रिम्–बुद्धिः (AI) |
| (ख) | यूपीआय् (UPI) | आभासीया–वास्तविकता |
| (ग) | डिजि–लॉकर् | शीघ्रं, सुरक्षितं, सुगमं च डिजिटल्–धनदेय–प्रत्यर्पणम् |
| (घ) | फास्टॅग् (FASTag) | डिजिटल्–प्रमाणपत्रम् |
| (ङ) | वीआर (VR) | राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणम् |

**उत्तरम्—**

| क्रमः | शब्दः | संयोजनीयः शब्दः |
|---|---|---|
| (क) | हॉलोग्राम् | कृत्रिम्–बुद्धिः (AI) |
| (ख) | यूपीआय् (UPI) | शीघ्रं, सुरक्षितं, सुगमं च |
| (ग) | डिजि–लॉकर् | डिजिटल्–धनदेय–प्रत्यर्पणम् डिजिटल्–प्रमाणपत्रम् |
| (घ) | फास्टॅग् (FASTag) | राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणम् |
| (ङ) | वीआर (VR) | आभासीया–वास्तविकता |

**4. अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत—**

यूपीआय्, दीक्षा, प्रधानमन्त्रिणः भाषणं, स्वचालितं पारदर्शकं च, जीवनं

(क) प्रधानमन्त्रिसङ्ग्रहालये हॉलोग्राम्–द्वारा ................दृश्यते ।

(ख) डिजिटल्–भारतस्य आर्थिकसमावेशनं सुगमं कर्तुं ............प्रणाली अस्ति।

(ग) डिजिटल्–शासनं ..................... सेवां प्रददाति।

(घ) डिजिटल्–भारतस्य शिक्षाक्षेत्रे ........... नाम डिजिटल्– शैक्षिकमञ्चः अस्ति।

(ङ) भारतस्य डिजिटल्–परिवर्तनं सर्वाणि ..........................क्षेत्राणि स्पृशति।

**उत्तरम्—** (क) प्रधानमन्त्रिणः भाषणं, (ख) यूपीआय्, (ग) स्वचालितं पारदर्शकं च, (घ) दीक्षा, (ङ) जीवनं।

**5. अधः अस्मिन् पाठे आगतानां शब्दानाम् आधारेण शब्दजालं प्रदत्तम् अस्ति। अत्र वामतः दक्षिणम् उपरितः अधः च आधारं कृत्वा उदाहरणानुसारं शब्दान् रेखाङ्कयत—**

**वर्गचित्र –जालम्**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| मा | रा | डि | जी | लॉ | क | र् | सं | पी | सै |
| य् | ज | जि | आ | व | हॉ | त | वा | ए | ब |
| ग | मा | ट | भा | र्धि | लो | ब्लॉ | द | म् | र् |
| व् | र्गः | ल् | सी | ता | ग्रा | क् | य | कि | क्रै |
| यू | पी | आ | य् | ना | म् | चे | न्त्र | सा | म् |
| वा | म | जे | शा | वि | ज्ञा | न् | म् | न् | ना |
| णि | ज | म | स | नि | अ | र्थ | व्य | व | स्था |
| ज्य | को | वे | न् | म | कृ | त्रि | म | बु | द्धिः |
| म् | ज | क | स्व | य | म् | प्र | भा | शि | नि |
| प्रौ | द्यो | गि | की | फा | स्टॅ | ग् | छ | क्षा | ष्ठा |

**उत्तरम्—**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| मा | रा | डि | जी | लॉ | क | र् | सं | पी | सै |
| य् | ज | जि | आ | व | हॉ | त | वा | ए | ब |
| ग | मा | ट | भा | र्धि | लो | ब्लॉ | द | म् | र् |
| व् | र्गः | ल् | सी | ता | ग्रा | क् | य | कि | क्रै |
| यू | पी | आ | य् | ना | म् | चे | न्त्र | सा | म् |
| वा | म | जे | शा | वि | ज्ञा | न् | म् | न् | ना |
| णि | ज | म | स | नि | अ | र्थ | व्य | व | स्था |
| ज्य | को | वे | न् | म | कृ | त्रि | म | बु | द्धिः |
| म् | ज | क | स्व | य | म् | प्र | भा | शि | नि |
| प्रौ | द्यो | गि | की | फा | स्टॅ | ग् | छ | क्षा | ष्ठा |

**6. अधोलिखितान् शब्दान् वर्गद्वये विभजत— सङ्गणक- सम्बद्धाः, असङ्गणकसम्बद्धाः च—**

**उत्तरम्—**

| सङ्गणकसम्बद्धाः | असङ्गणकसम्बद्धाः |
|---|---|
| अन्तर्जालम् | शिक्षिका |
| सङ्गणकः | विद्यालयः |
| ई-पत्रम् | पाठ्यपुस्तकम् |
| डिजिटल् | लेखनी |

**7. अधोलिखितानि वाक्यानि पठित्वा शुद्धं (✓) अशुद्धं (×) वा इति चिह्नीकुरुत—**

(क) हॉलोग्राम् कृत्रिमबुद्धेः एकः प्रकारः अस्ति। ( )

(ख) वर्धित-वास्तविकतायाः उपयोगिता ऐतिहासिक-घटनानां प्रत्यक्षानुभवाय अस्ति। ( )

(ग) डिजिटल्-प्रक्षेपण-मानचित्रं भारतस्य विकासयात्रां प्रदर्शयति। ( )

(घ) फास्टॅग् इति राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणं करोति। ( )

(ङ) डिजी-लॉकर् इत्यस्य माध्यमेन केवलम् आधार-पत्रं सुरक्षितं शक्यते। ( )

(च) भारतस्य डिजिटल्-परिवर्तनं केवलं शासने प्रभावं करोति, नागरिकजीवने न। ( )

(छ) उमङ्ग्, माय्-गव्, जेम् इत्यादयः ई-शासन-मञ्चाः सन्ति। ( )

**उत्तरम्—** (क) शुद्धं, (ख) शुद्धं, (ग) शुद्धं, (घ) शुद्धं, (ङ) अशुद्धं, (च) अशुद्धं, (छ) शुद्धं।

**8. अव्यवस्थितान् वर्णान् शब्ददृष्ट्या व्यवस्थितरूपेण लिखत— उदाहरणम्—**

वेयवित्तीसमानशम् = वित्तीयसमावेशनम्

(क) कसङ्गम्ण। (ख) कार्वसरः।

(ग) लयःविद्या। (घ) जिकडिलॉर्।

(ङ) शक्तसुम्।

**उत्तरम्—** (क) सङ्गणकम्। (ख) सर्वकारः। (ग) विद्यालयः। (घ) डिजिलॉकर्। (ङ) सुशक्तम्।

**9. अधोलिखितं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत—**

अद्यतने विज्ञानयुगे सर्वे मनुष्याः डिजिटल्-प्रौद्योगिक्याः प्रयोगं कुर्वन्ति। जनाः अन्तर्जालस्य, सचलदूरवाण्याः, सङ्गणकस्य च साहाय्येन शीघ्रं कार्याणि सम्पादयन्ति। विद्यार्थिनः अपि ई-अधिगम-प्रणालीं स्वीकृत्य ज्ञानं वर्धयन्ति।

प्रश्नाः—

(क) अद्यतनं युगं कीदृशम् अस्ति?

**उत्तरम्—** अद्यतनं युगं विज्ञानयुगम् अस्ति।

(ख) मानवाः केषां साहाय्येन कार्याणि शीघ्रं कुर्वन्ति?

**उत्तरम्—** मानवाः अन्तर्जालस्य, संचालितदूरवाण्याः,

सङ्गणकस्य च साहाय्येन कार्याणि शीघ्रं कुर्वन्ति।

(ग) ई–अधिगम–प्रणाल्या: प्रयोगं के कुर्वन्ति?

**उत्तरम्—** विद्यार्थी: ई–अधिगम–प्रणाल्या: प्रयोगं कुर्वन्ति।

# अतिरिक्त अभ्यासः

**1. उचितम् उत्तरं चित्वा क्रमाक्षरं लिखत—**

(i) अस्माकं देश: कै: कीर्ति: लभते?

(अ) आध्यात्मिक भाषणै: (ब) आविष्कारै:

(स) यात्राभि (द) वार्ताभि:

(ii) सम्पूर्णे विश्वे कस्य चर्चा अस्ति?

(अ) डिजिटलभारतस्य (ब) महानभारतस्य

(स) आध्यात्मिकभारतस्य (द) नवभारतस्य

(iii) सर्वे नागरिका: कथं सौविध्यं लभन्ते?

(अ) घण्टिका नादेन (ब) विमल वादनेन

(स) पिञ्जस्य नोदेन (द) क्षण मात्रेण

(iv) डिजिटलेन भारतीयानां जीवनं कीदृशं जयमानम् अस्ति?

(अ) अधिकं सरलम् (ब) सुलभम्

(स) कठिनम् (द) कूटम्

(v) अधुना सर्वा वसुधा कीदृशी?

(अ) कुटुम्बकम् (ब) देशम्

(स) समानम् (द) गणम्

**उत्तरम्—** (i) (ब), (ii) (अ), (iii) (स), (iv) (अ), (v) (अ)।

**2. समुचित पदेन रिक्तस्थानानि पूरयत—**

(क) सम्पूर्णा वसुधा ................ अस्ति।

(ख) अनेन ................ जीवनं सरलं अस्ति।

(ग) ................ सर्व नागरिक सौविध्यं लभ्यते।

(घ) अद्य सम्पूर्ण विश्वे ................ इत्यस्य चर्चा श्रूयते।

(ङ) ................ सम्पूर्णा वसुधा कुटुम्बकम् अस्ति।

**उत्तरम्—** (क) कुटुम्बकम् (ख) भारतीयानां (ग) पिञ्जस्य नोदनेन (घ) डिजिटल् भारतम् (ङ) डिजिटल पटले।

**3. सत्यम् असत्यं वा चिनुत—**

(क) भारत सांस्कृतिक क्षेत्रे एव समृद्धम्। ( )

(ख) भारतम् आविष्कारै: कीर्तिं लभते। ( )

(ग) डिजिटल भारतस्य चर्चापि न श्रूयते। ( )

(घ) भारतीयानां जीवनं कठिनम् अस्ति। ( )

(ङ) विभक्तं भारतीय समाजम्। ( )

**उत्तरम्—** (क) असत्यम्, (ख) सत्यम्, (ग) असत्यम्, (घ) असत्यम्, (ङ) असत्यम्।

**4. उचितेन विशेष्य पदेन सह मेलयत—**

| विशेषण | विशेष्य |
|---|---|
| (क) अधिकं | प्रौद्योगिक्य: |
| (ख) सम्पूर्णा | वस्तूनि |
| (ग) विविधा: | बाला: |
| (घ) प्रदर्शितानि | वसुधा |
| (ङ) सर्वे | सरलम् |

**उत्तरम्—**

| विशेषण | विशेष्य |
|---|---|
| (क) अधिकं | सरलम् |
| (ख) सम्पूर्णा | वसुधा |
| (ग) विविधा: | प्रौद्योगिक्य: |
| (घ) प्रदर्शितानि | वस्तूनि |
| (ङ) सर्वे | बाला: |

**5. एकपदेन उत्तरत—**

(क) उत्सुका: छात्रा: सङ्ग्रहालये किं पश्यन्ति?

**उत्तरम्—** प्रदर्शितानि वस्तूनि।

(ख) सङ्ग्रहालये का: प्रदर्शिता:?

**उत्तरम्—** डिजिटल प्रौद्योगिक्य:।

(ग) डिजिटलपटले सम्पूर्णा वसुधा कीदृशी भाति?

(घ) डिजिटलेन भारतीयानां जीवनं कीदृशं संवृतम्?

**उत्तरम्—** अधिकं सरलम्।

(ङ) आविष्कारै: भारतं किं लभते?

**उत्तरम्—** कीर्तिम्।

**6. पूर्णवाक्येन उत्तरत—**

(क) विविधा प्रौद्योगिक्य: कुत्र प्रदर्शिता:?

**उत्तरम्—** विविधा प्रौद्योगिक्य: सङ्ग्रहालये प्रदर्शिता:।

(ख) डिजिटल पटले का कुटुम्बकम् इव?

**उत्तरम्—** डिजिटल पटले सम्पूर्णा वसुधा कुटुम्बम् इव ।

(ग) अनेन केषां जीवनम् अधिकं सरलम् अस्ति?

**उत्तरम्—** अनेन भारतीयानां जीवनम् अधिकं सरलं अस्ति।

(घ) कस्य नोदनेन नागरिक सौविध्यं लभ्यते?

**उत्तरम्—** एकस्मै पिञ्जस्य नोदनेन नागरिक सौविध्यं लभ्यते।

**7. एतान् अपि प्रश्नान् पूर्ण वाक्ये: उत्तरत।**

**उत्तरम्—** हॉलोग्राम द्वारा प्रधानमन्त्रिण: भाषणं श्रूयते दृश्यते च प्रत्यक्षमेव प्रधानमन्त्री अत्र उपविष्ट: इति भासते। अनेन दिवंगता: नेतार: अपि जीविता: इव दृश्यन्ते। (होलोग्राम द्वारा प्रधानमंत्री का भाषण सुना जाता है और देखा जाता है। प्रत्यक्ष में प्रधानमंत्री यहाँ बैठे हुए से लगते हैं। इससे स्वर्गवासी नेता भी जीवित की तरह दिखाई देते हैं।)

(ख) सङ्ग्रहालये किं किम् अस्ति?

**उत्तरम्—** अत्र वर्धिता-वास्तविकता, आभासीया वास्तविकता च इत्याभ्यां सम्बद्धानि उपकरणानि अपि सन्ति। अनेन ऐतिहासिक वृत्तानि प्रत्यक्षमिव अनुभूयन्ते। भारतीया स्वतन्त्रता सङ्ग्रामं दृष्ट्वा अस्माकं पूर्वजानां संघर्ष: क्रियान् विशाल: आसीत् इति ज्ञायते।

# 7 मञ्जुलमञ्जूषा सुन्दरसुरभाषा

**1. अध: प्रदत्तानां प्रश्नानां एकपदेन उत्तरं लिखत—**

(क) सुन्दरसुरभाषा कस्य वचनातीता?

(ख) संस्कृतभाषा कुत्र विजयते?

(ग) संस्कृतभाषा कस्य आशा?

(घ) संस्कृते कति रसा: सन्ति?

(ङ) कस्या: ध्वनिश्रवणेन सुखं वर्धते?

**उत्तरम्—** (क) कवे: (ख) धरायाम् (ग) जीवनस्य (घ) नवरसा: (ङ) संस्कृतभाषाया:।

**2. अध: प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—**

(क) संस्कृतभाषा केषां जीवनस्य आशा अस्ति?

**उत्तरम्—** वेदव्यास-वाल्मीकि-मुनीनां, कालिदास-बाणभट्टादिकवीनां, पौराणिक सामान्य-जनानां जीवनस्य आशा अस्ति।

(ख) केषां विचारा: जनान् अभिप्रेरयन्ति?

**उत्तरम्—** वेद-उपनिषद्-वेदान्त-पुराणादीनां विचारा: जनान् प्रेरयन्ति।

(ग) कै: रसै: समृद्धा साहित्यपरम्परा विराजते?

**उत्तरम्—** शृङ्गार, हास्य, करुण, रौद्र, वीर, भयानक, वीभत्स, अद्भुत, शान्त, प्रभृतिभि: रसै: विराजते साहित्यपरम्परा।

(घ) संस्कृतभाषा केषु शास्त्रेषु विहरति?

**उत्तरम्—** संस्कृतभाषा चिकित्सा-खगोलादिषु शास्त्रेषु विहरति।

(ङ) संस्कृतभाषाया: कानि कानि सम्बोधनपदानि अत्र प्रयुक्तानि ?

**उत्तरम्—** श्रुतिसुखनिनदे, सकलप्रमोदे, स्मृतिहितवरदे, सरसविनोदे, गतिमतिप्रेरक, काव्य विशारदे इत्यादीनि सम्बोधनानि अत्र प्रयुक्तानि।

**3. रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत—**

(क) मुनिगणा: संस्कृतभाषाया: विकासं कृतवन्त:।

**उत्तरम्—** मुनिगणा: कस्या: विकासं कृतवन्त:?

(ख) सामान्यजनानां जीवनं काव्यै: प्रभावितम् अस्ति।

**उत्तरम्—** सामान्यजनानां जीवनं कै: प्रभावितम् अस्ति?

(ग) कवय: अपि उपादेयानि काव्यानि रचितवन्त:।

**उत्तरम्—** कवय: अपि कीदृशानि काव्यानि रचितवन्त:?

(घ) संस्कृतभाषा पृथिव्यां विहरति।

**उत्तरम्—** संस्कृतभाषा कुत्र विहरति?

(ङ) संस्कृतभाषा विविधभाषा: परिपोषयति।

**उत्तरम्—** संस्कृतभाषा का: परिपोषयति?

(च) वेद-वेदाङ्गादीनि गभीराणि शास्त्राणि सन्ति।

**उत्तरम्—** वेद-वेदाङ्गादीनि गभीराणि कानि सन्ति?

**4. अध: प्रदत्तानां पदानाम् उदाहरणानुसारं विभक्तिं वचनं च लिखत—**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| यथा— मातः | सम्बोधनम् | एकवचनम् |
| तव | ................ | ................ |
| मञ्जूषा | ................ | ................ |
| संस्कृतिः | ................ | ................ |
| जनानाम् | ................ | ................ |
| जीवनस्य | ................ | ................ |
| धरायाम् | ................ | ................ |
| शास्त्रेषु | ................ | ................ |

**उत्तरम्—**

| | | |
|---|---|---|
| तव | षष्ठी | एकवचनम् |
| मञ्जूषा | प्रथमा | एकवचनम् |
| संस्कृतिः | प्रथमा | एकवचनम् |
| जनानाम् | षष्ठी | बहुवचनम् |
| जीवनस्य | षष्ठी | एकवचनम् |
| धरायाम् | सप्तमी | एकवचनम् |
| शास्त्रेषु | सप्तमी | बहुवचनम् |

**5. अधोलिखितानां पद्यांशानां यथायोग्यं मेलनं कुरुत—**

| | **कवर्गः** | **खवर्गः** |
|---|---|---|
| (क) | अयि मातस्तव पोषणक्षमता | स्मृतिहितवरदे सरसविनोदे |
| (ख) | वेदव्यास- वाल्मीकि- मुनीनां | विजयते धरायाम् |
| (ग) | पौराणिक- सामान्यजनानाम् | मम वचनातीता, सुन्दरसुरभाषा |
| (घ) | श्रुतिसुखनिनदे सकलप्रमोदे | कालिदासबाण ादिकवीनाम् |
| (ङ) | वैद्यव्योम- शास्त्रादिविहारा | जीवनस्य आशा, सुन्दरसुरभाषा |

**उत्तरम्—**

| | **कवर्गः** | **खवर्गः** |
|---|---|---|
| (क) | अयि मातस्तव पोषणक्षमता | मम वचनातीता, सुन्दरसुरभाषा |
| (ख) | वेदव्यास- वाल्मीकि- मुनीनां | कालिदासबाण ादिकवीनाम् |
| (ग) | पौराणिक- सामान्यजनानाम् | जीवनस्य आशा, सुन्दरसुरभाषा |
| (घ) | श्रुतिसुखनिनदे सकलप्रमोदे | स्मृतिहितवरदे सरसविनोदे |
| (ङ) | वैद्यव्योम- शास्त्रादिविहारा | विजयते धरायाम् |

**6. उदाहरणानुसारम् अधः प्रदत्तानां पदानाम् एकपदेन अर्थं लिखत—**

यथा, देवस्य आलयः = देवालयः

(क) सुराणां भाषा = ......................

(ख) सुन्दरी सुरभाषा = .........................

(ग) नवरसैः रुचिरा = .......................

(घ) पोषणस्य क्षमता = .........................

(ङ) मञ्जुला भाषा = ........................

**उत्तरम्—** (क) सुरभाषा (ख) सुन्दरसुरभाषा (ग) नवरसरुचिरा (घ) पोषणक्षमता (ङ) मञ्जुलभाषा।

**7. पेटिकातः पदानि चित्वा रिक्तस्थानानि पूरयत—**

कालिदासबाणादि, आशा, संस्कृतिः, विजयते, मम, वेदविषय, मञ्जुलमञ्जूषा, सकलप्रमोदे

यथा— मुनिवर-विकसित-कविवर-विलसित-मञ्जुल-मञ्जूषा सुन्दरसुरभाषा ।

(क) अयि मातः तव पोषणक्षमता ...................... वचनातीता।

(ख) वेदव्यास-वाल्मीकि-मुनीनां ....................... कवीनाम्।

(ग) पौराणिक-सामान्य-जनानां जीवनस्य ........... ।

(घ) श्रुतिसुखनिनदे ................ स्मृतिहितवरदे सरसविनोदे।

(ङ) गति-मति-प्रेरक-काव्य-विशारदे, तव ..... एषा सुन्दरसुरभाषा।

(च) नवरस-रुचिरालङ्कृतिधारा ............... -वेदान्तविचारा ।

(छ) वैद्य-व्योम-शास्त्रादि-विहारा........धरायाम्, सुन्दरसुरभाषा ।

**उत्तरम्—** (क) मम (ख) कालिदासबाणादि (ग) आशा (घ) सकल प्रमोदे (ङ) संस्कृति: (च) वेदविषय (छ) विजयते।

**8. अधोलिखितविकल्पेषु प्रसङ्गानुसारम् अर्थं चिनुत—**

(क) ''मञ्जुलमञ्जूषा'' इत्यस्य अर्थ: क:? ''मञ्जुलमञ्जूषा'' इसका क्या अर्थ है?

(i) कठोरभाषा (ii) शोचनीया भाषा

(iii) मनोहररूपेण संकलिता (iv) सामान्य भाषा

(ख) सुन्दरसुरभाषा केषां जीवनस्य आशा उच्यते?

(i) केवलं कवीनाम् (ii) बालकानाम्

(iii) पौराणिक-सामान्यजनानाम् (iv) छात्राणाम्

(ग) सुन्दरसुरभाषा कुत्र विजयते?

(i) आकाशे (ii) जलधौ

(iii) धरायाम् (iv) पवने

(घ) सुन्दरसुरभाषायां किं नास्ति?

(i) शास्त्रज्ञानम् (ii) संस्कृति:

(iii) वेदान्तचिन्तनम् (iv) अशुद्धि:

(ङ) कवि: सुन्दरसुरभाषां केन पदेन सम्बोधयति?

(i) पित : (ii) मात:

(iii) भ्रात : (iv) दात:

**उत्तरम्—** (क) (iii), (ख) (iii), (ग) (iii), (घ) (iv), (ङ) (ii)।

# अतिरिक्त अभ्यास:

**1. उचितम् उत्तरं चित्वा क्रमाक्षरं लिखत—**

(i) संस्कृतभाषा कीदृशी?

(अ) सुन्दरभाषा (ब) सरलभाषा

(स) द्वयोएव (द) सुगमाभाषा

(ii) संस्कृतभाषा केन रूपेण ज्ञायते?

(अ) देवभाषा (ब) देववाणी

(स) सुरभाषा (द) सर्वाभि:

(iii) संस्कृतभाषा कै: विकसिता?

(अ) देवै: (ब) मनुष्यै:

(स) मुनिवरै: (द) गोपै:

(iv) संस्कृतभाषा कुत्र विलसति?

(अ) कविवरेषु (ब) मुनिवरेषु

(स) छात्रेषु (द) शिक्षकेषु

(v) का भाषा वचनातीता?

(अ) हिन्दीभाषा (ब) आङ्ग्लभाषा

(स) संस्कृतभाषा (द) ब्रजभाषा

**उत्तरम्—** (i) (स), (ii) (द), (iii) (स), (iv) (अ), (v) (स)।

**2. उचितेन पदेन रिक्तस्थानानि पूरयत—**

(क) मुनिवर ................।

(ख) ................ विलसित।

(ग) ................ मञ्जूषा।

(घ) सुन्दर ................।

**उत्तरम्—** (क) विकसित (ख) कविवर (ग) मञ्जुल (घ) सुरभाषा।

**3. सत्यम् असत्यं च चिनुत—**

(क) कविवर विकसित। ( )

(ख) मुनिवर विलसित। ( )

(ग) मञ्जुल मञ्जूषा। ( )

(घ) सुन्दर सुरभाषा। ( )

**उत्तरम्—** (क) असत्यम्, (ख) असत्यम्, (ग) सत्यम्, (घ) सत्यम्।

**4. उचित खण्डेन सह मेलयत—**

| **(क)** | **(ख)** |
|---|---|
| (क) मुनिवरविकसित | सुन्दर सुरभाषा |
| (ख) मञ्जुल मञ्जूषा | पोषण क्षमता |
| (ग) अयिमातस्तव | सुन्दर सुरभाषा |
| (घ) मम वचनातीता | कविवर विलसित |

**उत्तरम्—**

| **(क)** | **(ख)** |
|---|---|
| (क) मुनिवरविकसित | कविवरविलसित |
| (ख) मञ्जुल मञ्जूषा | सुन्दरसुरभाषा |
| (ग) अयिमातस्तव | पोषणक्षमता |
| (घ) मम वचनातीता | सुन्दरसुरभाषा |

**5. एकपदेन उत्तरत—**

(क) वचनातीता का?

**उत्तरम्—** संस्कृतभाषा।

(ख) देवभाषा रूपेण का ज्ञायते?

**उत्तरम्—** संस्कृतभाषा।

(ग) संस्कृत भाषाया: किं वर्णनातीतम्?

**उत्तरम्—** गौरवम्।

(घ) संस्कृतभाषाया: पोषणक्षमता कीदृशी?

**उत्तरम्—** वचनातीत।

(ङ) बहूनां भाषाणाम् जननी का?

**उत्तरम्—** संस्कृतभाषा।

**6. पूर्णवाक्येन उत्तरत—**

(क) संस्कृत केषां भाषा?

**उत्तरम्—** संस्कृतभाषा भूयिष्ठानां भारतीयानां भाषा।

(ख) संस्कृत भाषाया: सौन्दर्यं के वर्धितवन्त:?

**उत्तरम्—** बहव: कवय: काव्यरचनाया अस्या: सौन्दर्य वर्धितवन्त:।

(ग) संस्कृतभाषा अन्या: भाषाया: कथं पोषयति?

**उत्तरम्—** संस्कृतभाषा स्व पदावलिभि: अन्या: भाषानां ज्ञानं विज्ञानं च परितोषयति।

(घ) गुरुभाषा का?

**उत्तरम्—** अस्माकं गुरुभाषा संस्कृतभाषा अस्ति।

**7. एतान् अपि प्रश्नान पूर्ण वाक्यै: उत्तरत—**

(क) कीदृशी सुन्दरभाषा संस्कृतम्?

**उत्तरम्—** मुनिवरै: विकसिता, कविषु विलसिता, मञ्जुल ज्ञानस्य मञ्जूषा, एषा सुन्दर: सुरभारती।

(ख) संस्कृतभाषा कै: परिपूर्ण:?

**उत्तरम्—** संस्कृतभाषा शृंङ्गारादिभि: नवरसै, अनुप्रासादिभि: शब्दालङ्कारै: अर्थालङ्कारै:, वैदर्भीत्यादिभ: रीतिभि: शब्दै: अर्थै: च परिपूर्णा अस्ति।

# 8 पश्यत कोणमैशान्यं भारतस्य मनोहरम्

**1. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत—**

(क) अस्माकं देशे कति राज्यानि सन्ति?

(ख) प्राचीनेतिहासे का: स्वाधीना: आसन्?

(ग) केषां समवाय: 'सप्तभगिन्य:' इति कथ्यते?

(घ) अस्माकं देशे कति केन्द्रशासितप्रदेशा: सन्ति?

(ङ) सप्तभगिनी-प्रदेशे क: उद्योग: सर्वप्रमुख:?

**उत्तरम्—** (क) अष्टाविंशति:, (ख) इमानि सप्तराज्यानि, (ग) एषानां राज्यानाम्, (घ) अष्ट, (ङ) वंशवृक्ष उद्योग:।

**2. अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—**

(क) भ्रातृसहित-भगिनीसप्तके कानि राज्यानि सन्ति?

**उत्तरम्—** भ्रात्रा सिक्किमेन सह भगिनिसप्तके इमानि राज्यानि सन्ति-अरुणाचलप्रदेश:, असम:, मणिपुरं, मिजोरम:, मेघालय:, नागालैण्डं, त्रिपुरा चेति।

(ख) इमानि राज्यानि सप्तभगिन्य: इति किमर्थं कथ्यन्ते?

**उत्तरम्—** कदाचिद् सामाजिक-सांस्कृतिक-परिदृश्यानां साम्यात् भौगोलिकवैशिष्ट्यात् च इमानि उक्तोपाधिना प्रथितानि।

(ग) ऐशान्यकोणप्रदेशेषु के निवसन्ति?

**उत्तरम्—** अत्र गारो, खासी, नागा, मिजो, लेप्चा प्रभृत्य: बहव: जनजातीया: निवसन्ति।

(घ) पूर्वोत्तरप्रादेशिका: केषु निष्णाता: सन्ति?

**उत्तरम्—** एतत्प्रादेशिका: बहुभाषाभि: समन्विता:, पर्वपरम्पराभि: परिपूरिता:, स्वलीला-कलसु च निष्णाता: सन्ति।

(ङ) वंशवृक्षवस्तूनाम् उपयोग: कुत्र क्रियते?

**उत्तरम्—** प्रदेशेऽस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते। आवस्त्राभूषणेभ्य: गृहनिर्माणपर्यन्तं प्राय: वंशवृक्षनिर्मितानां वस्तूनाम् उपयोग: क्रियते।

**3. अधोलिखितेषु पदेषु प्रकृति-प्रत्ययविभागं कुरुत—**

| | | |
|---|---|---|
| यथा— गन्तुम् | गम् | + तुमुन् |
| (क) ज्ञातुम् | ............ | + ................ |

(ख) विश्रुतः ............+ ...............

(ग) अतिरिच्य ............+ ...............

(घ) पठनीयम् ............+ ...............

**उत्तरम्—** (क) ज्ञातुम् ज्ञा + तुमुन्

(ख) विश्रुतः वि + श्रु + क्त

(ग) अतिरिच्य अति + रिच् + ल्यप्

(घ) पठनीयम् पठ् + अनीयर्

**4. रेखाङ्कितम् पदम् आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) वयं स्वदेशस्य राज्यानां विषये ज्ञातुमिच्छामः।

**उत्तरम्—** वयं कस्य राज्यानां विषये ज्ञातुमिच्छामः?

(ख) सप्तभगिन्यः प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः।

**उत्तरम्—** काः प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः?

(ग) प्रदेशेऽस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते।

**उत्तरम्—** प्रदेशेऽस्मिन् केषां बाहुल्यं वर्तते?

(घ) एतानि राज्यानि तु भ्रमणार्थं स्वर्गसदृशानि।

**उत्तरम्—** एतानि राज्यानि तु भ्रमणार्थं कीदृशानि?

**5. यथानिर्देशम् उत्तरत—**

(क) 'महोदये! मम भगिनी कथयति'। अत्र 'मम' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(ख) 'सामाजिक-सांस्कृतिकपरिदृश्यानां साम्याद् इमानि उक्तोपाधिना प्रथितानि'। अस्मिन् वाक्ये प्रथितानि इति क्रियापदस्य कर्तृपदं किम्?

(ग) 'एतेषां राज्यानां पुनः सङ्घटनं विहितम्'। अत्र 'सङ्घटनम्' इति कर्तृपदस्य क्रियापदं किम्?

(घ) 'अत्र वंशवृक्षाणां प्राचुर्यं विद्यते'। अस्मात् वाक्यात् 'अल्पता' इति पदस्य विपरीतार्थकं पदं चित्वा लिखत?

(ङ) 'क्षेत्रपरिमाणैः इमानि लघूनि वर्तन्ते'। अस्मिन् वाक्ये 'सन्ति' इति क्रियापदस्य किं समानार्थकं पदं प्रयुक्तम्?

**उत्तरम्—** (क) स्वरायै (स्वरा के लिए), (ख) उपाधिना, (ग) विहितम्, (घ) प्राचुर्यम्, (ङ) वर्तन्ते।

**6. अधः शब्दजालं प्रदत्तम् अस्ति। अस्मिन् उपरितः अधः, वामतः दक्षिणं चेति आधारं कृत्वा सार्थक-शब्दान् रेखाङ्कयत—**

वर्गचित्र-जालम्

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ज | न | जा | तिः | म | त्रि | खा | सी |
| च | अ | र | सि | णि | पु | ना | गा |
| भ्रा | ता | स | क्कि | पु | रा | ज्या | नि |
| मि | जो | र | मः | र | सं | स्कृ | तिः |
| पू | र्वो | त्त | र | म् | दे | श | स्य |
| ब | स | प्त | भ | गि | न्यः | गा | रो |
| प्रा | कृ | ति | कः | वं | श | वृ | क्षः |
| भ | गि | नि | अ | रु | णा | च | लः |
| भ्रा | ता | मे | घा | ल | यः | ध | मि |
| ना | गा | लै | ण्डम् | ब | ह | वः | जोः |

**उत्तरम्—** वर्गचित्र-जालम्

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ज | न | जा | तिः | म | त्रि | खा | सी |
| च | अ | र | सि | णि | पु | ना | गा |
| भ्रा | ता | स | क्कि | पु | रा | ज्या | नि |
| मि | जो | र | मः | र | सं | स्कृ | तिः |
| पू | र्वो | त्त | र | म् | दे | श | स्य |
| ब | स | प्त | भ | गि | न्यः | गा | रो |
| प्रा | कृ | ति | कः | वं | श | वृ | क्षः |
| भ | गि | नि | अ | रु | णा | च | लः |
| भ्रा | ता | मे | घा | ल | यः | ध | मि |
| ना | गा | लै | ण्डम् | ब | ह | वः | जोः |

**7. पट्टिकातः पदानि चित्वा रिक्तस्थानानि पूरयत—**

> सिक्किमः, पूर्वोत्तरराज्यानि, अष्टाविंशतिः, स्वदेशस्य राज्यानाम्, अरुणाचलप्रदेशः, असमः, मणिपुरं, मिजोरमः, मेघालयः, नागालैण्डं, त्रिपुरा, जनजातिः, प्राचुर्यम्

(क) छात्राः अद्य .................. विषये ज्ञातुमिच्छन्ति।

(ख) अस्माकं देशे ............... राज्यानि तथा अष्टकेन्द्रशासितप्रदेशाः सन्ति।

(ग) सप्तभगिन्यः एकः भ्राता च इति .................. कथ्यन्ते।

(घ) सप्तभगिन्यः इत्युक्तानि राज्यानि ..........., ..........., ..........., ..........., ..........., ..........., ...........।

(ङ) प्रदेशेऽस्मिन् .................... बाहुल्यम् अस्ति।

(छ) पूर्वोत्तरराज्येषु वंशवृक्षाणां ..................... विद्यते।

**उत्तरम्—** (क) स्वदेशस्य राज्यानाम्, (ख) अष्टाविंशतिः, (ग) पूर्वोत्तरराज्यानि, (घ) अरुणाचलप्रदेशः, असमः, मणिपुरं, मिजोरमः, मेघालयः, नागालैण्डं, त्रिपुरा, सिक्किमः, (ङ) जनजातिः, (छ) प्राचुर्यम्।

**8. भिन्नप्रकृतिकं पदं चिनुत—**

(क) गच्छति, पठति, धावति, अहसत्, क्रीडति।

(ख) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः।

(ग) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्।

(घ) व्याघ्रः, भल्लूकः, गजः, कपोतः, शाखा, वृषभः, सिंहः।

(ङ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा।

**उत्तरम्—** (क) अहसत्, (ख) लेखिका, (ग) आम्रः (घ) शाखा, (ङ) यानम्,

**9. विशेष्य-विशेषणानाम् उचितं मेलनं कुरुत—**

| विशेषण-पदानि | विशेष्य-पदानि |
|---|---|
| अयम् | संस्कृतिः |
| संस्कृतिविशिष्टायाम् | इतिहासे |
| महत्त्वाधायिनी | प्रदेशः |
| प्राचीने | समवायः |
| एकः | भारतभूमौ |

**उत्तरम्—**

| विशेषण-पदानि | विशेष्य-पदानि |
|---|---|
| अयम् | प्रदेशः |
| संस्कृतिविशिष्टायाम् | भारतभूमौ |
| महत्त्वाधायिनी | संस्कृतिः |
| प्राचीने | इतिहासे |
| एकः | समवायः |

# परियोजनाकार्यम्

१. ''पश्यत कोणमैशान्यं भारतस्य मनोहरम्'' इति पाठस्य सन्दर्भे भित्तिपत्रे उत्तरपूर्वराज्यानां पृथक् पृथक्

मानचित्रं प्रदर्शयत । संस्कृतभाषया कस्यापि राज्यस्य पञ्चवाक्यैः विवरणं लिखत। (पश्यतकोणमैशान्यं भारतस्य मनोहरम्'' इस पाठ के संदर्भ में स्फोरक-पत्र पर उत्तरपूर्व के राज्यों को अलग-अलग मानचित्र में दिखाइए। संस्कृतभाषा में किसी राज्य का पाँच वाक्यों में विवरण लिखिए।)

**उदाहरणम्—**

**नागालैण्डम्** होर्न्बिल्-महोत्सवः अत्र प्रसिद्धः।




**उत्तरम्—** अत्र खनिजम् इन्धन तैलम्, इन्धनानिलः च प्रचुर मात्रायाम् अस्ति। लोके बृहत्तमः रमणीयः नदी द्वीपः। अत्र ब्रह्मपुत्रम् नदी अस्ति। अत्र एक शृङ्गगजाः अपि दृश्यन्ते। असमे असमिया, बङ्गला, बोडो आङ्गलादयः भाषाः प्रचलिताः। एषः प्रसिद्धः प्रदेशः।

२. पूर्वोत्तरराज्यानां पर्यटनस्थलानां नामानि लिखित्वा तेषां संक्षिप्तं वर्णनं कुरुत। (पूर्वोत्तर राज्यों के पर्यटन स्थलों के नाम लिखकर उनका संक्षिप्त वर्णन कीजिए।)

उदाहरणम्—

राज्यम् — असमः

नाम — काजीरङ्गा राष्ट्रियम् अभयारण्यम्

वर्णनम् — अत्र एकशृङ्गगजाः दृश्यन्ते। एतत् यूनेस्को-विश्व-प्रत्नकीर्ति-स्थलम् अस्ति।

**उत्तरम्—** अरुणाचलप्रदेशः— अरुणाचलस्य राजधानी ईटानगरम् अस्ति। अत्र प्रमुखातः आङ्गलभाषायाः-प्रचारः। न्योशी आदीनां द्वादशभाषाणाम् अपि अत्र प्रचारः दृश्यते। भारते अरुणाचलप्रदेशे सूर्यस्य अरुणोदयः सर्वप्रथमं भवति। अतः अरुणाचलः इति कथ्यते। अत्र आकर्षः हिमपातः भवति।

# अतिरिक्त अभ्यासः

**1. उचितम् उत्तरं चित्वा क्रमाक्षरं लिखत—**

(i) कः प्रयोगः प्रतीकात्मकः?

(अ) 'सप्तभगिन्यः एक भ्राता' इति नामकरणम्

(ब) अष्टराज्यानाम् उल्लेखः

(स) एतेषां समवेत स्वरूपः

(द) एतेषां प्राकृतिकं सौन्दर्यम्

(ii) कस्मात् एतानि 'सप्तभगिन्यः' इति नाम्ना प्रथितानि—

(अ) सामाजिक साम्यात्

(ब) सांस्कृतिक साम्यात्

(स) भौगोलिक वैशिष्ट्यात

(द) सर्वेभ्यः

(iii) एतेषु लघुभ्राता इति नाम्ना कः विश्रुतः?

(अ) सिक्किमः (ब) असमः

(स) त्रिपुरा (द) मिजोरमः

(iv) भारतस्य का दिशा मनोहरा?

(अ) पूर्व (ब) प्राची

(स) कोणमैशान्यं (द) नैऋतकोणाद्

**उत्तरम्—** (i) (अ), (ii) (द), (iii) (अ), (iv) (स)।

**2. उचितेन पदेन रिक्तस्थानानि पूरयत—**

(क) भ्राता ................ इति विश्रुतः।

(ख) ................ भारतस्य मनोहरम्।

(ग) अत्यन्त ................ वार्ता।

(घ) अष्टराज्यानाम् एकः ................ अस्ति।

**उत्तरम्—** (क) सिक्किमः (ख) कोणमैशन्यं (ग) सुखकरी (घ) समवायः।

**3. सत्यम् असत्यं च चिनुत—**

(क) सम्यक् जानाति तव भगिनी। ( )

(ख) अस्माकं देशे अष्टाविंशत राज्यानि सन्ति? ( )

(ग) अष्ट राज्यानाम् कोऽपि समवायो नास्ति। ( )

(घ) देशे अष्ट केन्द्रशासित प्रदेशानि। ( )

**उत्तरम्—** (क) सत्यम्, (ख) सत्यम्, (ग) असत्यम्, (घ) सत्यम्।

**4. उचित विलोम पदेन सह मेलनं कुरुत—**

| (क) पद | (ख) विलोम पद |
|---|---|
| (क) विशेषः | परदेशस्य |
| (ख) निम्नः | असमवायः |
| (ग) स्वदेशस्य | उच्चः |
| (घ) समवायः | सामान्यः |

**उत्तरम्—**

| (क) पद | (ख) विलोम पद |
|---|---|
| (क) विशेषः | सामान्यः |
| (ख) निम्नः | उच्चः |
| (ग) स्वदेशस्य | परदेशस्य |
| (घ) समवायः | असमवायः |

**5. एकपदेन उत्तरत—**

(क) अष्ट राज्यानां किम् एकः समवायः?

**उत्तरम्—** अष्ट भगिनी।

(ख) 'अस्माकं देशे अष्टाविंशति राज्यानि' इति का कथयति?

**उत्तरम्—** स्वराया: भगिनी।

(ग) 'भगिनी सप्तकं' कति राज्यानां समूहम्?

**उत्तरम्—** अष्ट राज्यानाम्।

(घ) क्षेत्रे लघ्वपि सन्तः गुणगौरवेन कीदृशयः?

**उत्तरम्—** वृहत्तराः।

**6. पूर्णवाक्येन उत्तरत—**

(क) काः न केनापि स्वायत्ती कृताः?

**उत्तरम्—** इमाः सप्तभगिन्यः न केनापि स्वायत्ती कृता।

(ख) एताषां संस्कृतिः कीदृशी अस्ति?

**उत्तरम्—** विविध संस्कृति विशिष्टायां भारतभूमौ एतासां भ्रातृ भगिनीनां संस्कृतिः महत्वाधायिनी वर्तते।

(ग) एतानि कैः समृद्धानि सन्ति?

**उत्तरम्—** एतानि पर्वत, वृक्ष पुष्प प्रभृतिभिः प्राकृतिक सम्पद्भिः सुसमृद्धानि सन्ति।

(घ) वंश उद्योगः इदानीं कीदृशं प्रवर्तते?

**उत्तरम्—** वंश उद्योगः इदानीं अन्तर्राष्ट्रीय ख्यातिम् अवाप्तः अस्ति।

**7. एतान् अपि प्रश्नान पूर्ण वाक्यैः उत्तरत।**

(क) तत्र वंश वृक्षस्य उपयोगः कथं क्रियते?

**उत्तरम्—** प्रदेशे अस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते। आवस्त्राभूषणे न गृहनिर्माण पर्यन्तं प्रायः वंश वृक्ष निर्मितानां वस्तूनाम् उपयोगः क्रियते। यतो हि अत्र वंश वृक्षाणां प्राचुर्यम् विद्यते।

(ख) ते केषु निष्णाताः सन्ति?

**उत्तरम्—** ते स्व लीलासु–कलासु च निष्णाताः। वंश हस्तकला तेषां अर्जनस्य साधनं। यतः अद्य वंश उद्योगः अन्ताराष्ट्रिय ख्यातिं प्राप्तः अस्ति।

# 9 कोऽरुक्? कोऽरुक्? कोऽरुक्?

**1. अधोलिखितान् प्रश्नान् एकपदेन उत्तरत—**

(क) शुकरूपं कः धृतवान्?

(ख) धन्वन्तरिः (शुकः) कुत्र उपविश्य ध्वनिम् अकरोत्?

(ग) अन्ते शुकः कस्य आश्रमस्य समीपं गतवान्?

(घ) ऋतवः कति सन्ति?

(ङ) वाग्भटः शुकस्य रहस्यं केभ्यः उक्तवान्?

**उत्तरम्—** (क) धन्वन्तरिः, (ख) वृक्षे, (ग) वाग्भटस्य, (घ) षड्, (ङ) शिष्येभ्यः।

**2. पट्टिकातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—**

| चरकस्य, कुटीरसमीपं, भारतवर्षे, आयुर्वेदज्ञानेन, अतिमात्रं |
|---|

(क) ................ जनाः कथं निरामयाः भवन्ति?

(ख) अन्ते सः वैद्यस्य वाग्भटस्य ................ गतवान्।

(ग) तव उत्कृष्टेन .............. अहम् अतीव सन्तुष्टः अस्मि।

(घ) महर्षेः ................ नाम भवन्तः श्रुतवन्तः स्युः।

(ङ) लघुद्रव्याणि ................ सेवनेन हानिकराणि जायन्ते।

**उत्तरम्—** (क) भारतवर्षे, (ख) कुटीरसमीपम्, (ग) आयुर्वेदज्ञानेन, (घ) चरकस्य, (ङ) अतिमात्रं।

**3.** अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तराणि लिखत—

(क) मधुरां वाणीं श्रुत्वा चिकित्सानिरतः वाग्भटः किम् अकरोत्?

**उत्तरम्—** प्राङ्गणम् आगत्य सर्वासु दिक्षु अपश्यत्।

(ख) वाग्भटः झटिति किम् अकरोत्?

**उत्तरम्—** सः झटिति तस्मै विहगाय मधुरानि फलानि समर्पितवान।

(ग) छात्राः पुनः जिज्ञासया आचार्यं किम् अपृच्छन्?

**उत्तरम्—** आचार्यः हितभुक्, मितभुक्, ऋतुभुक् इति एतेषां कः आशयः?

(घ) भगवान् धन्वन्तरिः अस्माकं कृते संक्षेपेण किं प्रदत्तवान्?

**उत्तरम्—** अस्माकं कृते संक्षेपेण स्वास्थ्य रक्षणाय सूत्ररूपेण सन्देशं च प्रदत्तवान्।

(ङ) ऋषयः नित्यं कां प्रार्थनां कुर्वन्ति?

**उत्तरम्—** सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत।

**4. पाठात् यथोचितानि विशेषणपदानि विशेष्यपदानि वा चित्वा रिक्तस्थानानि पूरयत—**

| विशेषणम् | विशेष्यम् | विशेषणम् | विशेष्यम् |
|---|---|---|---|
| विभिन्नानाम् | व्याधीनाम् | ............... | वैद्याः |
| मनोहरम् | ............... | ............... | वृक्षे |
| ............... | प्राङ्गणे | ............... | वाणीम् |
| वैद्यः | वाग्भटः | लौकिकः | .............. |
| मधुराणि | .............. | समुचितम् | .............. |
| ............... | वैद्यस्य | ............... | शिष्याः |
| महर्षेः | .............. | सात्त्विकम् | .............. |

**उत्तरम्—**

| विशेषणम् | विशेष्यम् | विशेषणम् | विशेष्यम् |
|---|---|---|---|
| विभिन्नानाम् | व्याधीनाम् | प्रख्यात! | वैद्याः |
| मनोहरम् | शुकरूपम् | पार्श्वस्थे | वृक्षे |
| विशाले | प्राङ्गणे | मधुरां | वाणीम् |
| वैद्यः | वाग्भटः | लौकिकः | खगः |
| मधुराणि | फलानि | समुचितम् | उत्तरम् |
| उत्तमस्य | वैद्यस्य | विस्मिताः | शिष्याः |
| महर्षेः | चरकस्य | सात्त्विकम् | भोजनम् |

**5. पाठं पठित्वा अधोलिखितपट्टिकातः पदानि चित्वा उचितसञ्चिकायां पूरयत—**

लौकिकः, व्याधीनाम्, देवः, वृक्षे, त्रीणि, उत्तमस्य, वाणीम्, विस्मितः, मधुरया, प्रश्नान्, पूज्यः, खगः, विशाले, शुकम्, वाग्भटः

**उत्तरम्—**

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| लौकिकः | व्याधीनाम् |
| पूज्यः | देवः |
| विशाले | वृक्षे |
| त्रीणि | सूत्राणि |
| उत्तमस्य | वैद्यस्य |
| मधुरां | वाणीम् |
| लौकिकः | खगः |
| मनोहरम् | शुकम् |
| मधुरया | गिरा |

विस्मित: वाग्भट:

**6. अधोलिखितानि वाक्यानि पठित्वा तेन सम्बद्धं श्लोकं पाठात् चित्वा लिखत—**

(क) अस्माभि: नित्यं व्यायाम:, स्नानं, दन्तधावनं, बुभुक्षायाञ्च भोजनं कर्तव्यम्।

**उत्तरम्—** व्यायाम: प्रातरुत्थाय नित्यं दन्तविशोधनम्।
स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम्॥

(ख) अस्माभि: हितकर: आहार: सेवनीय: येन विकाराणां शमनं स्वास्थ्यस्य च रक्षणं भवेत्।

**उत्तरम्—** तच्च नित्यं प्रयुञ्जती स्वास्थ्यम् येनानुवर्तते।
अजातानां विकारणामनुपत्तिकरं च यत्॥

(ग) ऋतो: अनुसारं भोजनेन बलस्य वर्णस्य च अभिवृद्धि: भवति।

**उत्तरम्—** तस्याशिताद्यादाहारात् बलं वर्णञ्च वर्धते।
तस्यर्तुसात्म्यं विदितं चेष्टाहारव्यपाश्रयम्॥

## परियोजनाकार्यम्

**१. विद्यालयस्य परिसरे विद्यमानानां पञ्चवृक्षाणां नामानि तेषाम् औषधीयं प्रयोगं च लिखत।**

**उत्तरम्—** विद्यालयस्य परिसरे पञ्चवृक्षाणां नामानि—

1. निम्नवृक्ष:— एषमनेकेषु व्याधिनिरोधेसक्षम:।
2. पिप्पल:—रक्तचापवृद्धिम् अवरोधति। हृदयगतिं नियन्त्रति।
3. अर्जुन:— एष: उच्चरक्तचापं नियन्त्रति।
4. करञ्च:— अतिसारं रोधते।
5. हरसिंगार:— पारिजात: वा-अस्मिरोगान् उपचरति।

**२. स्वास्थ्येन सम्बद्धानां दशश्लोकानां संग्रहणं कुरुत।**

**उत्तरम्—** स्वास्थ्यसम्बद्धा: दशश्लोका:—

1. तच्च नित्यं प्रयुञ्जीत, स्वास्थ्यं येनानुवर्तते।
अजातानां विकाराणामनुत्पत्तिकरं च यत्॥
2. अल्पादाने गुरूणां च लघूनां चातिसेवने।
मात्राकारणमुद्दिष्टं द्रव्याणां गुरुलाघवे॥
3. तस्याशिताद्यादाहारात् बलं वर्णश्च वर्धते।
तस्यर्तुसात्म्यं विदितम् चेष्टाहारव्यपाश्रयम्॥
4. व्यायाम: प्रातरुत्थाय, नित्यं दन्तविशोधनम्।
स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम्॥
5. सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु:खभाग्भवेत्॥
6. आयु: सत्त्वबलारोग्यसुखप्रीतिविविर्धना:।
रस्या: स्निग्धा: स्थिरा हृद्या: आहारा: सात्त्विकप्रिया:॥
7. कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन:
आहारा राजसस्येष्टा दु:खशोकामयप्रदा:॥
8. यातयामं गतरसं पूतिं पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥
9. मिताहारो नर: सोढुं शक्त: कष्ट-शतं सुखम्।
अनभ्यस्तो हि कष्टानामध्यशनो विपद्यते॥
10. अशीतेनाम्भसा स्नानं कवोष्णदुग्धसेवनम्।
एतद् वो मानुषा: पथ्यं स्निग्धमुष्णं च भोजनम्॥

**३. पाठे आगतान् श्लोकान् कण्ठस्थीकृत्य कक्षायां श्रावयत।**

**उत्तरम्—** छात्रा: स्वयमेव श्रावयन्तु। (छात्र स्वयं ही सुनाएँ।)

## अतिरिक्त अभ्यास:

**1. उचितं विकल्पं चित्वा क्रमाक्षरं लिखत—**

(i) भारतवर्षे वैद्या: विभिन्नानां व्याधीनां किं कुर्वन्ति?
(अ) दमनम् (ब) शमनम्
(स) रेचनम् (द) दायनम्

(ii) किं रूपं धृत्वा धन्वन्तरि उत्तमस्य वैद्यस्य अन्वेषाय अगच्छत्।
(अ) शुकस्य (ब) कपोतस्य
(स) हंसस्य (द) वकस्य

(iii) वाग्भटस्य कुटीरसमीपं स: कदा अगच्छत्?
(अ) प्रारम्भे (ब) अन्ते
(स) मध्ये (द) रात्रौ

(iv) वाग्भटस्य प्राङ्गणे शुक: कुत्र अतिष्ठत्?
(अ) पुष्पतरुम् (ब) शमीवृक्षं
(स) सालवृक्षं (द) जम्बुवृक्षम्

**उत्तरम्—** (i) (ब), (ii) (अ), (iii) (ब), (iv) (अ)।

**2. उचितेन पदेन रिक्तस्थानानि पूरयत—**

(क) ................ शुकरूपं घृत्वा प्रतिग्रामम् अभ्रमत्।
(ख) खगस्य शब्दं प्रति कस्यापि ............... नासीत्।

(ग) वाग्भटः ................ आगत्य सर्वासु दिक्षु अपश्यत्।

(घ) नायं ................ खगः।

**उत्तरम्—** (क) मनोहरम् (ख) अवधानम् (ग) प्राङ्गणम् (घ) लौकिकः।

**3. सत्यम् असत्यं वा चिनुत—**

(क) एषः निश्चयेन कश्चन देव विशेषः। ( )

(ख) शुकं दृष्ट्वा विस्मितः वाग्भटः चिन्तितवान्। ( )

(ग) सः झटिति तस्मै कटु फलानि समर्पितवान्।( )

(घ) सर्वप्रथमे सः खगः फलानि अखादत्। ( )

**उत्तरम्—** (क) सत्यम्, (ख) सत्यम्, (ग) असत्यम्, (घ) असत्यम्।

**4. विशेषण पदैः सह विशेष्यं मेलयत—**

| **क-विशेषण** | **ख-विशेष्यः** |
|---|---|
| (क) मनोहरम् | प्राङ्गणे |
| (ख) बहूनाम् | वैद्यानाम् |
| (ग) विशाले | गिरा |
| (घ) मधुरया | शुकरूपम् |

**उत्तरम्—**

| क-विशेषण | ख-विशेष्यः |
|---|---|
| (क) मनोहरम् | शुकरूपम् |
| (ख) बहूनाम् | वैद्यानाम् |
| (ग) विशाले | प्राङ्गणे |
| (घ) मधुरया | गिरा |

**5. एकपदेन उत्तरत—**

(क) सः खगः निश्चयेन कः आसीत्?

**उत्तरम्—** देवविशेषः।

(ख) वाग्भटः कस्मै फलानि समर्पितवान्?

**उत्तरम्—** शुकाय।

(ग) प्राङ्गणम् आगत्य वाग्भटः किम् अपश्यत्?

**उत्तरम्—** मनोहरं शुकम्।

(घ) पुष्पतरुः कुत्र आसीत्?

**उत्तरम्—** प्राङ्गणे।

**6. पूर्णवाक्येन उत्तरत—**

(क) शुकः फलानि अगृहीत्वा किम् अकरोत्?

**उत्तरम्—** शुकः 'कोऽरुक्' इति प्रश्नस्वरेण शब्दमकरोत्।

(ख) वाग्भटः अचिरेण किम अकरोत्?

**उत्तरम्—** सः अचिरेण सूत्ररूपाणि त्रीणि उत्तराणि प्राददात्।

(ग) धन्वन्तरि वाग्भटं किं उक्तवान्?

**उत्तरम्—** वत्स, अहं धन्वन्तरि अस्मि। उत्तमस्य वैद्यस्य अन्वेषणाय अत्र समागता।

(घ) धन्वन्तरिः वाग्भटाय किम् आदिष्टवान्?

**उत्तरम्—** अष्टाङ्गविचार-सारभूतं तन्त्रं विरचये।

**7. एतान् प्रश्नान् अपि पूर्ण वाक्यैः उत्तरत।**

(क) वाग्भटः छात्राणां जिज्ञासां शमयन् कथम् उत्तरति?

**उत्तरम्—** छात्राः! शृणुत, एषः शुकः वदति यद 'कः अरुक्' अर्थात् कः स्वस्थः नीरोगः वा वर्तते। तदा मया उक्तम्—'हितभुक्, मितभुक्, ऋतुभुक्' च सः स्वस्थः भवति।

(ख) वाग्भटः छात्राणां पुनः जिज्ञासाम् कथं शान्तम् अकरोत्?

**उत्तरम्—** शिष्याः! महर्षेः चरकस्य नाम भवन्तः श्रुतवन्तः स्युः। सः हितभुक् विषये कथयति—यद भोजनं विकारान् न उत्पादयति अल्पमात्रं अगरिष्ठं, ऋतु अनुसारं च खादेत्।

# 10 सन्निमित्ते वरं त्यागः (क-भागः)

**1. पाठम् आधृत्य उदाहरणानुगुणं लिखत 'आम्' अथवा 'न'—**

यथा—

उत्तराणि—

किं राज्ञः शूद्रकस्य नगर्याः नाम शोभावती आसीत्?

आम्

किं वीरवरः अनेकशास्त्राणां ज्ञाता आसीत्?

न

(क) किं वीरवरः राजपुत्रः आसीत्?

आम्

(ख) 'किं ते वर्तनम्'? इति किं शूद्रक: अपृच्छत्?
आम्

(ग) किं वीरवरं राज्ञ: समीपे दौवारिक: अनयत्?
आम्

(घ) किं राजा शूद्रक: राजपुत्रं वीरवरं साक्षात् दृष्ट्वा एव वृत्तिम् अयच्छत्?
न

(ङ) किं वीरवर: स्ववेतनस्य चतुर्थं भागम् एव पत्न्यै यच्छति स्म?
आम्

(च) किं करुण-रोदन-ध्वनिं राजा श्रुतवान्?
आम्

(छ) किं करुणरोदनध्वनि: दिवसे श्रुत: आसीत्?
न

(ज) किं राजलक्ष्म्या उक्त: उपाय: अतीव दु:साध्य: आसीत्?
आम्

(झ) किं भगवती सर्वमङ्गला उपायं संसूच्य शीघ्रमेव अदृश्या अभवत्?
आम्

**2. अधोलिखितान् प्रश्नान् पूर्णवाक्येन उत्तरत—**

(क) शूद्रक: कीदृश: राजा आसीत्?

**उत्तरम्—** शूद्रक: महापराक्रमी नानाशास्त्रवित् च आसीत्।

(ख) वीरवर: कस्य समीपं गन्तुम् इच्छति स्म?

**उत्तरम्—** वीरवर: राजानं शूद्रकं समीपं गन्तुम् इच्छति स्म।

(ग) राज्ञ: शूद्रकस्य 'का ते सामग्री?' इति प्रश्नस्य उत्तरं वीरवर: किम् अयच्छत्?

**उत्तरम्—** इमौ बाहू, एष: खड्गश्च।

(घ) वीरवर: स्वगृहं कदा गच्छति स्म?

**उत्तरम्—** यदा राजा स्वयम् आदिशति तदा स्वगृहं गच्छति स्म।

(ङ) वीरवर: स्ववेतनस्य अर्धं केभ्य: यच्छति स्म?

**उत्तरम्—** स्ववेतनस्य देवेभ्य: अर्धं यच्छति स्म।

(च) राजलक्ष्मी: कुत्र सुखेन अवसत्?

**उत्तरम्—** राजलक्ष्मी: शूद्रकस्य भुजच्छायायां सुखेन अवसत्।

(छ) राजलक्ष्म्या: दु:खस्य कारणं श्रुत्वा बद्धाञ्जलि: वीरवर: किम् अवदत्?

**उत्तरम्—** अम्ब! कथय क: स: उपाय: दु:साध्य:।

**3. उदाहरणानुसारं निम्नलिखितानि वाक्यानि अन्वयरूपेण लिखत—**

यथा— वृत्त्यर्थमागतो राजपुत्रोऽस्मि, तस्मान्नय मां स्वामिन: समीपम्।
(अहं) राजपुत्र: वृत्त्यर्थम् आगत: अस्मि, तस्माद् मां स्वामिन: समीपं नय।

(क) आसीत् शोभावती नाम काचन नगरी।

**उत्तरम्—** शोभावती नाम काचन नगरी आसीत्?

(ख) प्रतिदिनं सुवर्णशतचतुष्टयं देव!

**उत्तरम्—** देव! सुवर्णशतचतुष्टयं प्रतिदिनम्।

(ग) देव ! दिनचतुष्टयस्य वेतनार्पणेन प्रथममवगम्यतां स्वरूपमस्य वेतनार्थिनो राजपुत्रस्य, किमुपपन्नमेतत् वेतनं न वेति।

**उत्तरम्—** देव! दिनचतुष्टयस्य वेतनार्पणेन प्रथमस्य स्वरूपमस्य वेतनार्थिनो राजपुत्रस्य किमुपपन्नमेतत् वेतनं न वा इति।

(घ) क्रन्दनमनुसर राजपुत्र!

**उत्तरम्—** राजपुत्र! क्रन्द्रनमनुसर।

(ङ) अथ मन्त्रिणां वचनात् ताम्बूलदानेन नियोजितोऽसौ राजपुत्रो वीरवरो नरपतिना।

**उत्तरम्—** नरपतिना असौ राजपुत्र: वीरवर: मन्त्रिणां वचनात् ताम्बूलदानेन नियोजित:।

(च) नैष गन्तुमर्हति राजपुत्र एकाकी सूचिभेद्ये तिमिरेऽस्मिन्।

**उत्तरम्—** अस्मिन सूचिभेद्ये तिमिरेऽस्मिन् राजपुत्र: एकाकी न गन्तुमर्हति।

(छ) भगवति! अस्त्यत्र कश्चिदुपायो येन भगवत्या: पुनरिह चिरवासो भवति, सुचिरं जीवति च स्वामी?

**उत्तरम्—** भगवति! येन भगवत्या: इह चिरवासो भवेत, सुचिरं जीवित: च स्वामी अस्ति अत्र कश्चित् उपाय:।

(ज) तदा पुनर्जीविष्यति राजा शूद्रको वर्षाणां शतम्।

**उत्तरम्—** राजा शूद्रको तदा वर्षाणां शतम् पुनर्जीविष्यति।

**4. उदाहरणानुगुणं पाठगतानि पदानि अधिकृत्य रिक्तस्थानानि पूरयत—**

यथा— अथैकदा = अथ + ·····एकदा·····

| | | |
|---|---|---|
| वृत्त्यर्थम् | = वृत्ति | + ………. |
| कस्मादपि | = ………. | + अपि |
| कोऽपि | = कः | + ………. |
| राजपुत्रोऽस्मि | = ………. | + अस्मि |
| यथेष्टम् | = यथा | + ………. |
| वेतनार्पणेन | = वेतन | + ………. |
| तदालोक्य | = | ………. |
| + | आलोक्य | |
| ततोऽसौ | = ततः | + ………. |
| वर्त्तनार्थिनो | = ………. | + अर्थिनः |
| तदवशिष्टं | = ………. | + अवशिष्टम् |
| राजदर्शनादनन्तरं | = राजदर्शनात् | + ………. |
| वेति | = ………. | + इति |
| राजलक्ष्मीरुवाच | = राजलक्ष्मीः | + ………. |
| चार्द्धं | = ………. | + अर्धम् |
| बहिर्नगरादालोकिता | = बहिः + ………. | + आलोकिता |
| कापि | = ………. | + अपि |
| प्रत्युवाच | = प्रति | + ………. |
| राजलक्ष्मीरस्मि | = ………. | + अस्मि |
| स्थास्यामीति | = स्थास्यामि | + ………. |
| भुजच्छायायां | = ………. | + ………. |
| अस्त्यत्र | = अस्ति | + ………. |
| कश्चिदुपायो | = | ………. |
| + | उपायः | |

**उत्तरम्—**

| | | |
|---|---|---|
| वृत्त्यर्थम् | = वृत्ति | + अर्थम् |
| कस्मादपि | = कस्मात् | + अपि |
| कोऽपि | = कः | + अपि |
| राजपुत्रोऽस्मि | = राजपुत्रः | + अस्मि |
| यथेष्टम् | = यथा | + इष्टम् |
| वेतनार्पणेन | = वेतन | + अर्पणेन |
| तदालोक्य | = | तद् + आलोक्य |
| ततोऽसौ | = ततः | + असौ |
| वर्त्तनार्थिनो | = वर्त्तन | + अर्थिनः |
| तदवशिष्टं | = तत् | + अवशिष्टम् |
| राजदर्शनादनन्तरं | = राजदर्शनात् | + अनन्तरम् |
| वेति | = वा | + इति |
| राजलक्ष्मीरुवाच | = राजलक्ष्मीः | + उवाच |
| चार्द्धं | = च | + अर्धम् |
| बहिर्नगरादालोकिता | = बहिः + नगरात् | + आलोकिता |
| कापि | = का | + अपि |
| प्रत्युवाच | = प्रति | + उवाच |
| राजलक्ष्मीरस्मि | = राजलक्ष्मीः | + अस्मि |
| स्थास्यामीति | = स्थास्यामि | + इति |
| भुजच्छायायां | = भुजः | + छायायाम् |
| अस्त्यत्र | = अस्ति | + अत्र |
| कश्चिदुपायो | = कश्चिद् | + उपायः |

**5.** अधोलिखितेषु वाक्येषु कृष्णवर्णीयपदानि केभ्यः प्रयुक्तानि इति उदाहरणानुगुणं लिखत—

यथा—अहं भवतः सेवायां नियोजितः। राज्ञे

(क) ततः असौ तद्रोदनस्वरानुसरणक्रमेण प्रचलितः। ……………………

(ख) तत् अहम् अपि गच्छामि पृष्ठतोऽस्य। ……………………

(ग) चिरम् एतस्य भुजच्छायायां सुमहता सुखेन निवसामि। ……………………

(घ) सा चातीव दुःसाध्या। ……………………

(ङ) किं ते वर्तनम्? ……………………

**उत्तरम्—** (क) वीरवरः, (ख) राजा, (ग) शूद्रकस्य (राज्ञे) (घ) प्रवृत्तिः, (ङ) वीरवराय।

**6. अधोलिखितानि वाक्यानि पठित्वा तेन सम्बद्धं श्लोकं पाठात् चित्वा लिखत—**

(क) राजलक्ष्मीः वदति यत् यदि वीरवरः स्वस्य सर्वप्रियं वस्तु त्यजति तदा सा पुनः शूद्रकस्य समीपे स्थास्यति।

(ख) राजा शूद्रकः प्रथमं वीरवरस्य वृत्त्यर्थं प्रार्थनां न स्वीकरोति।

(ग) एकदा कोऽपि वीरवरः नाम राजपुत्रः वृत्तिं प्राप्तुं राज्ञः शूद्रकस्य समीपं गच्छति।

(घ) सः तस्य कर्तव्यनिष्ठां साक्षात् पश्यति।

(ङ) राजा मन्त्रिणां मन्त्रणया वीरवराय वृत्तिं यच्छति।

**उत्तरम्—**

(क) यदि त्वया स्वस्थ …………… निवत्स्यामि।

(ख) नैतच्छक्यम्।

(ग) एकदा वीरवरनामा राजपुत्रः ............... मुपागच्छत्।
(घ) ततो नरपति खड्गपाणि .............. नगरीद्वारात्।
(ङ) अथ मन्त्रिणां वचनात् .............. नरपतिना।

**7. अधोलिखितानां वाक्यानां पदच्छेदं कुरुत—**

यथा— अथैकदा वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मादपि देशाद् राजद्वारमुपागच्छत्।
अथ एकदा वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मात् अपि देशात् राजद्वारम् उपागच्छत्।

(क) वृत्त्यर्थमागतो राजपुत्रोऽस्मि।

**उत्तरम्—** वृत्त्यर्थम् आगतः राजपुत्रः अस्मि।

(ख) अथैकदा कृष्णचतुर्दश्यामर्धरात्रे स राजा श्रुतवान् करुणरोदनध्वनिं कञ्चन।

**उत्तरम्—** अथ एकदा कृष्णचतुर्दश्याम् अर्द्धरात्रे सः राजा श्रुतवान् करुण रोदन ध्वनिः कञ्चन।

(ग) तदहमपि गच्छामि पृष्ठतोऽस्य निरूपयामि च किमेतदिति।

**उत्तरम्—** तत् अहम् अपि गच्छामि पृष्टतः अस्य निरूपयामि च किम् एतद् इति।

(घ) अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति।

**उत्तरम्—** अस्ति अत्र कश्चित् उपायः येन! भगवत्याः पुनः इह चिर वासः भवति।

(ङ) एकैवात्र प्रवृत्तिः सा चातीव दुःसाध्या।

**उत्तरम्—** एक एव अत्र प्रवृत्तिः सा च अतीव दुःसाध्या।

## परियोजनाकार्यम्

१. **कर्तव्यनिष्ठाम् अधिकृत्य दश सूक्तीनां श्लोकानां वा सङ्ग्रहणं कुरुत।**

**उत्तरम्—** कर्त्तव्यनिष्ठामधिकृत्य श्लोकाः—

(i) कुर्वन्नेवेह कर्माणि जिजीविषेच्छति समाः।
एवं त्वयि नान्यथेतोऽस्ति, न कर्म लिप्यते नरेः॥

(ii) यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम्।
एवं कर्म च कर्त्ता च संश्लिष्टावितरेतरम्॥

(iii) कार्येकर्मणि निर्वृत्ते यो बहून्यपि साधयेत्।
पूर्वकार्या विरोधेन अकार्यं कर्तुमर्हति॥

(iv) परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥

(v) कर्मण्येवाधिकारस्ते, मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते, सङ्गोऽस्त्वकर्मणि॥

२. **अस्य पाठस्य कृते कानिचन नूतनानि शीर्षकाणि लिखत।**

**उत्तरम्—** पाठस्य कृते अन्यानि शीर्षकाणि—

(i) परोपकारः
(ii) वीरवरस्य त्यागः।
(iii) परोपकाराय सतां विभूतयः।
(iv) त्यागेन लभते जनः।
(v) परेषां हितः परं हितः।

# अतिरिक्त अभ्यासः

**1. उचितं उत्तरं चित्वा क्रमाक्षरं लिखत—**

(i) कथा साहित्ये कीदृशाः उपदेशाः सन्ति?
(अ) जीवनसम्बद्धा (ब) मनोरञ्जका
(स) आध्यात्मिका (द) राजनीतिज्ञानस्य

(ii) कथा साहित्यस्य किं प्रयोजनम्?
(अ) उत्प्रेरणा (ब) प्रेरणा
(स) मनोरंजन (द) राजनीतिज्ञ निर्माण

(iii) संस्कृतकथा साहित्यं कीदृशम्?
(अ) समृद्धः (ब) वैविध्यपूर्णम्
(स) द्वयमेव (द) मनोरञ्जकः

(iv) हितोपदेशस्य लेखकः कः?
(अ) रुद्रभटः (ब) विष्णु शर्मा
(स) नारायण पण्डितः (द) नारायण शास्त्री

**उत्तरम्—** (i) (अ), (ii) (ब), (iii) (स), (iv) (स)।

**2. समुचित पदेन रिक्तस्थानानि पूरयत—**

(क) पूतचरित्रः ................ प्रतिवसति स्म।
(ख) तेन सह ................ नाम तस्य पत्नी आसीत्।
(ग) ................ नाम सुतः आसीत् वीरवरस्य।
(घ) वीरवरस्यात्यजायाः नाम ................ आसीत्।

**उत्तरम्—** (क) महीपतिः (ख) वेदरता (ग) शक्तिधरः

(घ) वीरवती।

**3. सत्यम् असत्यं वा चिनुत—**

(क) शोभावती नाम काचन नगरी आसीत्। ( )

(ख) तत्र राजा चरित्रहीनः आसीत्। ( )

(ग) वेदरता नाम कन्या समागता। ( )

(घ) अनुकरणीयोऽयं वीरवरः। ( )

**उत्तरम्—** (क) सत्यम्, (ख) असत्यम्, (ग) असत्यम्, (घ) सत्यम्।

**4. समुचित मेलनं कुरुत—**

| (क) | (ख) |
|---|---|
| (क) विशिष्टम् | उपदेशाः |
| (ख) विविधाः | राजपुत्रस्य |
| (ग) कर्तव्यनिष्ठस्य | पाठः |
| (घ) एषः | स्थानम् |

**उत्तरम्—**

| (क) | (ख) |
|---|---|
| (क) विशिष्टम् | स्थानम् |
| (ख) विविधाः | उपदेशाः |
| (ग) कर्तव्यनिष्ठस्य | राजपुत्रस्य |
| (घ) एषः | पाठः |

**5.** एकपदेन उत्तरत—

(क) कीदृशः वीरवरः राजद्वारमहर्निशं सेवते?

**उत्तरम्—** धृतायुधः।

(ख) वीरवरः स्वगृहं कदा गच्छति?

**उत्तरम्—** यदा स्वयं राजा आदिशति।

(ग) राजा कां ध्वनि श्रुतवान्?

**उत्तरम्—** करुणरोदन ध्वनिः।

(घ) अन्धकारः कीदृशः आसीत्?

**उत्तरम्—** सूचीभेद्यः।

**6. पूर्णवाक्येन उत्तरत—**

(क) राजलक्ष्मीः किमर्थं रोदिति स्म?

**उत्तरम्—** यतः राजा तृतीये दिवसे दिवंगतो भविष्यति तदा सा अनाथा भविष्यति।

(ख) नृपस्य आदेशं प्राप्य एव वीरवरः किम् अकरोत्?

**उत्तरम्—** सः तद्रोदन स्वरं अनुसरन् प्रचलितः।

(ग) रोदनं श्रुत्वा राजा वीरवरं किम् आदिष्टवान्?

**उत्तरम्—** क्रन्दनमनुसर राजपुत्र।

(घ) राजा तं कस्मात् अनुसर्तुम् ऐच्छत्?

**उत्तरम्—** अस्य पृष्ठतो गत्वा निरूपयामि, च किमेतदिति?

**7. एतान् प्रश्नान् अपि पूर्ण वाक्यैः उत्तरत—**

(क) राजा राजपुत्रं कथम् अन्वसरत्?

**उत्तरम्—** राजा व्ययास्यत् यत् न एषः राजपुत्रः वीरवरः एकाकी सूचि भेद्ये तिमिरेऽस्मिन। तस्मात् अहमपि गच्छामि पृष्ठतोऽस्य निरूपयामि च किमेतदिति।

(ख) राजलक्ष्मी वीरवरं किम् अकथयत?

**उत्तरम्—** अहमेतस्य भूपालस्य राजलक्ष्मीः अस्मि। चिरमेतस्य भुजच्छायायां सुमहता सुखेन निवसामि। साम्प्रतं तु देव्या अपराधेन न अद्य प्रभृति तृतीये दिवसे राजा पञ्चत्वं यास्यति तदाहमनाथा भविष्यामि। एतएव नात्र स्थास्यामि इति क्रन्दामि।

# 11 सन्निमित्ते वरं त्यागः (ख–भागः)

**1. निम्नलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) वीरवरो पत्नीं पुत्रं दुहितरञ्च प्राबोधयत्।

**उत्तरम्—** कः पत्नीं पुत्रं दुहितरञ्च प्राबोधयत्?

(ख) ततस्ते सर्वे सर्वमङ्गलाया आयतनं गताः।

**उत्तरम्—** ततस्ते सर्वे कस्याः आयतनं गताः?

(ग) वीरवरः वर्तनस्य निस्तारं पुत्रोत्सर्गेण अकरोत्।

**उत्तरम्—** वीरवरः वर्तनस्य निस्तारं कस्य उत्सर्गेण अकरोत्?

(घ) राजा स्वप्रासादं प्राविशत्।

**उत्तरम्—** राजा कुत्र प्राविशत्?

(ङ) महीपतिः वीरवराय समग्रकर्णाटप्रदेशम् अयच्छत्।

**उत्तरम्—** महीपतिः कस्मै समग्रकर्णाटप्रदेशम् अयच्छत्?

**2. अधोलिखितान् प्रश्नान् उत्तरत—**

(क) वीरवरः किम् अवर्णयत्?

**उत्तरम्—** वीरवरः अखिलराजलक्ष्मीसंवादम् अवर्णयत्।

(ख) प्राज्ञः धनानि जीवितञ्च केभ्यः उत्सृजेत्?

**उत्तरम्—** प्राज्ञः धनानि जीवितञ्च परार्थे उत्सृजेत्।

(ग) केन सदृशः लोके न भूतो न भविष्यति?

**उत्तरम्—** राजपुत्रः वीरवरेणसदृशः लोके न भूतो न भविष्यति।

(घ) का अदृश्या अभवत्?

**उत्तरम्—** भगवती सर्वमङ्गला अदृश्या अभवत्।

(ङ) सपरिवारः वीरवरः कुत्र गतवान्?

**उत्तरम्—** सपरिवारः वीरवरः सानन्दं स्वगृहं गतवान्।

**3. अधोलिखितेषु वाक्येषु रेखांकितपदानि केभ्यः प्रयुक्तानि इति उदाहरणानुगुणं लिखत—**

उदाहरणम्—

धन्यः अहम् स्वामिजीवितरक्षार्थं विनियुक्तः। शक्तिधराय

(क) भगवति! न मे प्रयोजनं राज्येन जीवितेन वा। ......................................

(ख) वत्स! अनेन ते सत्त्वोत्कर्षेण भृत्यवात्सल्येन च परं प्रीतास्मि। ......................................

(ग) धन्याहं यस्या ईदृशो जनको भ्राता च।............ .........................

(घ) तदेतत्परित्यक्तेन मम राज्येनापि किं प्रयोजनम्! ......................................

(ङ) अयम् अपि सपरिवारो जीवतु। ......................................

**उत्तरम्—** (क) राज्ञः शूद्रकाय (ख) राज्ञः शूद्रकाय (ग) वीरवत्यै (घ) राज्ञः शूद्रकाय (ङ) वीरवरः राजपुत्रायः।

**4. उदाहरणानुसारं निम्नलिखितानि वाक्यानि अन्वयरूपेण लिखत—**

यथा— कृतो मया गृहीतस्वामिवर्तनस्य निस्तारो स्वपुत्रोत्सर्गेण।

गृहीतस्वामिवर्तनस्य निस्तारो मया स्वपुत्रोत्सर्गेण कृतः।

(क) नेदानीं राज्यभङ्गस्ते भविष्यति।

**उत्तरम्—** इदानीं ते राज्यभङ्गः न भविष्यति।

(ख) तेन पातितं स्वशिरः स्वकरस्थखड्गेन।

**उत्तरम्—** तेन स्वकरस्थ खड्गेन स्वशिरः पातितम्।

(ग) तदा ममायुः शेषेणापि जीवतु राजपुत्रो वीरवरः सह पुत्रेण पत्न्या दुहित्रा च।

**उत्तरम्—** राजपुत्रो वीरवरः सह पुत्रेण पत्न्या दुहित्रा च ममायुः शेषेण अपि जीवतु।

(घ) तत्क्षणादेव देवी गताऽदर्शनम्।

**उत्तरम्—** तत्क्षणादेव देवी अदर्शनं गता।

(ङ) महीपतिस्तस्मै प्रायच्छत् समग्रकर्णाटप्रदेशं राजपुत्राय वीरवराय।

**उत्तरम्—** महीपतिः तस्मै राजपुत्राय वीरवराय समग्रकर्णाटप्रदेशं प्रायच्छत्।

(च) जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।

**उत्तरम्—** मादृशाः क्षुद्रजन्तवः जायन्ते च म्रियन्ते च।

**5. उदाहरणानुगुणम् अधोलिखितानां पदानां पदच्छेदं कुरुत—**

यथा—

यद्येवमस्मत्कुलोचितम् = यदि–एवम्–अस्मत्–कुलोचितम्

सत्त्वोत्कर्षेण = सत्त्व–उत्कर्षेण

(क) गृहीतस्वामिवर्तनस्य = ..............................

(ख) निस्तारोपायः = ..............................

(ग) गृह्यतामेष = ..............................

(घ) स्वपुत्रोत्सर्गेण = ..............................

(ङ) स्वकरस्थखड्गेन = ..............................

(च) तदेतत्परित्यक्तेन = ..............................

(छ) स्वशिरश्छेदनार्थमुत्क्षिप्तः= ..............................

(ज) मद्दर्शनाददृश्यताम् = ..............................

(झ) तत्क्षणादेव = ..............................

(ञ) लब्धजीवितः = ..............................

**उत्तरम्—**

(क) गृहीतस्वामिवर्तनस्य = ग्रहीत–स्वामि–वर्तनस्य

(ख) निस्तारोपायः = निस्तार + उपायः

(ग) गृह्यतामेष = गृह्यताम् + एषः

(घ) स्वपुत्रोत्सर्गेण = स्वपुत्र + उत्सर्गेण

(ङ) स्वकरस्थखड्गेन = स्वकरस्थ + खड्गेन

(च) तदेतत्परित्यक्तेन = तत्–एतत्–परित्यक्तेन

(छ) स्वशिरश्छेदनार्थमुत्क्षिप्तः= स्व शिरः + छेदन–अर्थम्+उत्क्षिप्तः

(ज) मद्दर्शनाददृश्यताम् = मत् + दर्शनात् + अदृश्यताम्

(झ) तत्क्षणादेव = तत् + क्षणात् + एव

(ञ) लब्धजीवित: = लब्ध-जीवित:

**6. (क) उदाहरणानुगुणं पाठगतानि पदानि अधिकृत्य सन्धियुक्तपदै: रिक्तस्थानानि पूरयत—**

यथा—

स्व + आवासम् = स्वावासम्

तत् + श्रुत्वा = ..........................

दुहितरम् + च = ..........................

धन्य: + अहम् = ..........................

जीवितम् + च + एव = ..........................

विलम्ब: + तात = ..........................

क: + अधुना = ..........................

न + आचरितव्यम् = ..........................

धन्या + अहम् = ..........................

निस्तार: + उपाय: = ..........................

वीरवर: + अवदत् = ..........................

तत: + असौ = ..........................

तत: + ते = ..........................

**उत्तरम्—** तत् + श्रुत्वा = तच्छ्रुत्वा

दुहितरम् + च = दुहितरञ्च

धन्य: + अहम् = धन्योऽहम्

जीवितम् + च + एव = जीवितञ्चैव

विलम्ब: + तात = विलम्बस्तात

क: + अधुना = कोऽधुना

न + आचरितव्यम् = नाचारितव्यम्

धन्या + अहम् = धन्याहम्

निस्तार: + उपाय: = निस्तारुपाय:

वीरवर: + अवदत् = वीरवरोऽवदत्

तत: + असौ = ततोऽसौ

तत: + ते = ततस्ते

(ख) **निम्नलिखितपदानां सन्धिच्छेदं कुरुत—**

शूद्रकोऽपि = ............ + ............

पुनर्भूपालेन = ............ + ............

महीपतिस्तस्मै = ............ + ............

प्रायच्छत् = ............ + ............

नृपतिरपि = ............ + ............

सर्वेषामदृश्य = ............ + ............

वार्ताऽन्या = ............ + ............

राज्यभङ्गस्ते = ............ + ............

गतिर्गन्तव्या = ............ + ............

इत्युक्त्वा = ............ + ............

नेदानीं = ............ + ............

प्रीतास्मि = ............ + ............

**उत्तरम्—** शूद्रकोऽपि = शूद्रक: + अपि

पुनर्भूपालेन = पुन: + भूपालेन

महीपतिस्तस्मै = महीपति: + तस्मै

प्रायच्छत् = प्र + अयच्छत्

नृपतिरपि = नृपति: + अपि

सर्वेषामदृश्य = सर्वेषाम् + अदृश्य

वार्ताऽन्या = वार्ता + अन्या

राज्यभङ्गस्ते = राज्यभङ्ग: + ते

गतिर्गन्तव्या = गति: + गन्तव्या

इत्युक्त्वा = इति + उक्त्वा

नेदानीं = न + इदानीम्

प्रीतास्मि = प्रीता + अस्मि

**7. अधोलिखितानि कथनानि कथाया: घटनानुसारं लिखत—**

(क) सर्वं दृष्ट्वा राजा शूद्रक: अपि सर्वस्वसमर्पणार्थं सिद्ध: अभवत्।

(ख) पितु: वार्तां श्रुत्वा शक्तिधर: प्रसन्नतया स्वस्य समर्पणार्थं सिद्ध: अभवत्।

(ग) प्रात: राजा वीरवरम् अपृच्छत् 'ह्य: रात्रौ किम् अभवत्'?

(घ) वीरवरो गृहं गत्वा पत्नीं पुत्रं पुत्रीञ्च प्राबोधयत्, सर्वां च वार्ताम् अकथयत्।

(ङ) वीरवरेण उक्तम्— स्वामिन्! न कापि वार्ता। सा नारी अदृश्या अभवत्।

(च) भगवती प्रसन्ना अभवत्। भगवत्या: कृपया सर्वे जीवितवन्त:।

(छ) वीरवर: परिवारेण सह सर्व स्वसमर्पणम् अकरोत्।

**उत्तरम्—**

(घ) वीरवरो गृहं गत्वा पत्नीं पुत्रं पुत्रीञ्च प्राबोधयत्, सर्वां च वार्ताम् अकथयत्।

(ख) पितु: वार्तां श्रुत्वा शक्तिधर: प्रसन्नतया स्वस्य समर्पणार्थं सिद्ध: अभवत्।

(छ) वीरवर: परिवारेण सह सर्व स्वसमर्पणम् अकरोत्।

(क) सर्वं दृष्ट्वा राजा शूद्रक: अपि सर्वस्वसमर्पणार्थं सिद्ध: अभवत्।

(च) भगवती प्रसन्ना अभवत्। भगवत्या: कृपया सर्वे जीवितवन्त:।

(ग) प्रात: राजा वीरवरम् अपृच्छत् 'ह्य: रात्रौ किम् अभवत्'?

(ङ) वीरवरेण उक्तम्— स्वामिन्! न कापि वार्ता। सा नारी अदृश्या अभवत्।

## परियोजनाकार्यम्

पाठस्य कथाधारेण सरलसंस्कृतेन एकं नाटकं रचयत तस्य मञ्चनं च कुरुत।

**उत्तरम्—** छात्रा: स्वाध्यापकै: सह कुर्वन्तु।

# अतिरिक्त अभ्यासः

**1. समुचितं विकल्पं चित्वा क्रमाक्षरं लिखत—**

(i) पत्नीं पुत्रं पुत्रीं च क: प्राबोधयत्?

(अ) राजा शूद्रक: (ब) वीरवर:
(स) सचिव: (द) मन्त्री

(ii) सर्वस्व विनियोगात् क: प्रसन्न आसीत्?

(अ) राजा (ब) वीरवर:
(स) शक्तिधर: (द) वेदरता।

(iii) एवं जनकं भ्रातरं च प्राप्य का धन्या आसीत्?

(अ) वेदरता (ब) वीरवती
(स) शक्तिधर: (द) देवी

(iv) सर्वमेतद् आचरितं तद्दृश्यं क: अलोकयत्?

(अ) राजा शूद्रक: (ब) वीरवर:
(स) शक्तिधर: (द) जनता:

**उत्तरम्—** (i) (ब), (ii) (ब), (iii) (ब), (iv) (अ)।

**2. समुचित पदेन रिक्तस्थानानि पूरयत—**

(क) धनानि जीवितं चैव................प्राज्ञ: उत्सृजेत्।

(ख) सन्निमित्त ................ त्याग:।

(ग) धन्या अहं यस्या: ................ जनको भ्राता च।

(घ) एष एव वर्तनस्य ................ उपाय:।

**उत्तरम्—** (क) परार्थे (ख), वरम् (ग) ईदृश: (घ) निस्तारस्य।

**3. सत्यम् असत्यं वा चिनुत—**

(क) धनानि जीवितञ्चैव परार्थे प्राज्ञ: उत्सृजेत। ( )

(ख) धन्योऽहं स्वामि जीवित रक्षार्थ यदि विनियुक्त:। ( )

(ग) तत: ते सर्वे स्वगृहं गता:। ( )

(घ) न कृतोमया वर्तनस्य निस्तार:। ( )

**उत्तरम्—** (क) सत्यम्, (ख) सत्यम्, (ग) सत्यम्, (घ) असत्यम्।

**4. 'क' खण्डस्य पदानि 'ख' खण्डस्य पदै: सह मेलयत्—**

| **(क)** | **(ख)** |
|---|---|
| (क) भगवति! | विनाशे नियते सति |
| (ख) महाराज: | मदृत्त: उपहार: |
| (ग) गृह्यताम् एष: | विजयताम् |
| (घ) वरं त्याग: | प्रसीद |

**उत्तरम्—**

| (क) | (ख) |
|---|---|
| (क) भगवति! | प्रसीद |
| (ख) महाराज: | विजयताम् |
| (ग) गृह्यताम् एष: | मद्दत्त: उपहार: |
| (घ) वरं त्याग: | विनाशे नियते सति |

**5. एकपदेन उत्तरत—**

(क) 'पुत्र वियुक्तस्य मे जीवनं निष्फलम्' क: उक्तवान्?

**उत्तरम्—** राजपुत्र: वीरवर:।

(ख) 'धन्योऽहं यदि स्वामि जीवित रक्षार्थं विनियुक्त:' इति केनोक्तम्?

**उत्तरम्—** शक्तिधरेण।

(ग) 'धन्याहं यस्या: ईदृशो जनको भ्राता च' इति कस्य वचनम्?

**उत्तरम्—** वीरवत्या।

(घ) 'स: आत्मानम् अपि देव्यै समर्पितवान्' क: एवं आचरत्?

**उत्तरम्—** राजपुत्र: वीरवर:।

**6. पूर्णवाक्येन उत्तरत—**

(क) क: आत्मानमपि देव्यै समर्पितवान्?

**उत्तरम्—** राजपुत्र वीरवर: आत्मानमपि देव्यै समर्पितवान्।

(ख) तत: कस्य पत्न्या दुहित्रा च एतदेवाचरितम्?

**उत्तरम्—** राजपुत्रस्य वीरवरस्य पत्न्या दुहित्रा चापि एवमेव आचरितम्।

(ग) वीरवर: स्वामिवर्तनस्य निस्तार: केन कृतवान्?

**उत्तरम्—** वीरवर: स्वामिवर्तनस्य निस्तार: स्वपुत्र समर्पणेन कृतवान्।

(घ) वीरवरेण स्वजीवनं कस्मात् निष्फलं मतम्?

**उत्तरम्—** पुत्र वियुक्तस्य जीवनं निष्फलम् इति मत्वा स: निराश: आसीत्।

**7. एतान् अपि प्रश्नान् पूर्ण वाक्यै: उत्तरत।**

(क) नृप: वीरवराय किम् उपहारं प्रदत्तवान्?

**उत्तरम्—** परमां प्रीति गतो राजा तस्मै प्रायच्छत् समग्रं कर्णाटं प्रदेशं राजपुत्राय वीरवराय।

(ख) देवी प्रसीदित्वा राजानं किम् अवदत्?

**उत्तरम्—** वत्स! अनेन ते सत्वोत्कर्षणेन भृत्यवात्सल्येन च अहं प्रसन्न: अस्मि। तर्हि गच्छ। विजयी भव। अयमपि सपरिवारो जयतु राजपुत्र: आदर्श चरितो वीरवर:।

# 12 सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते

**1. पाठे विद्यमानानां श्लोकानाम् उच्चारणं स्मरणं लेखनं च कुरुत—**

**उत्तरम्—** स्वयं शिक्षकस्य सहायतां कुरुत।

**2.** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखत—

(क) पाठका: केषां सम्यक् प्रयोगं कुर्यु:?

**उत्तरम्—** वर्णानाम्।

(ख) किम् अवश्यमेव पठनीयम्?

**उत्तरम्—** व्याकरणम्।

(ग) ब्रह्मलोके केन सम्मानं भवति?

**उत्तरम्—** सम्यगवर्णप्रयोगेन।

(घ) अधमा: पाठका: कति भवन्ति?

**उत्तरम्—** षड् पाठका: अद्यमा:।

(ङ) धैर्यं केषां गुण:?

**उत्तरम्—** पाठकानां गुण:।

**3. अधोलिखितानां प्रश्नानाम् पूर्णवाक्येन उत्तराणि लिखत—**

(क) व्याघ्री दंष्ट्राभ्यां कान् नयति?

**उत्तरम्—** व्याघ्री दंष्ट्राभ्यां पुत्रान् नयति।

(ख) वर्णा: कथं प्रयोक्तव्या:?

**उत्तरम्—** वर्णा: व्याघ्रीव प्रयोक्तव्या:।

(ग) पाठकानां षड्-गुणा: के भवन्ति?

**उत्तरम्—** माधुर्यं, अक्षरव्यक्ति:, पदच्छेद:, सुस्वरा, धैर्य:, लयसमर्थ: च एते षड् गुणा:।

(घ) के अधमा: पाठका: भवन्ति?

**उत्तरम्—** गीती, शीघ्री, शिर: कम्पी, लिखितपाठक:, अनर्थज्ञ:, अल्पकण्ठश्च षडेते अधमा: पाठका:।

(ङ) 'स्वजन:' 'श्वजन:' च इत्यनयो: अर्थदृष्ट्या क: भेद:?

**उत्तरम्—** स्वजन: आत्म-बन्धु: श्वजनश्च-कुक्कुर: इति भेद:।

(च) 'सकलं' 'शकलं' च इत्यनयो: अर्थदृष्ट्या क: भेद:?

**उत्तरम्—** सकलं-सम्पूर्णः यावत् शकलम्-खण्डम् इति।

**4. अधोलिखितानि लक्षणानि पाठकस्य गुणाः वा दोषाः वा इति विभजत—**

| |
|---|
| अक्षरव्यक्तिः, शीघ्री, लिखितपाठकः, लयसमर्थम्, अनर्थः, अल्पकण्ठः, माधुर्यम्, गीती, पदच्छेदः, शिरःकम्पी, अनर्थज्ञः, धैर्यम्, सुस्वरः |

**उत्तरम्—**

| | गुणाः | दोषाः |
|---|---|---|
| यथा— | अक्षरव्यक्तिः | शीघ्री |
| | लयसमर्थम् | लिखितपाठकः |
| | माधुर्यम् | गीती |
| | पदच्छेदः | शिरः कम्पी |
| | धैर्यम् | अनर्थज्ञः |
| | सुस्वरः | अल्पकण्ठः |

**5. श्लोकानुसारं रिक्तस्थानानि उचितैः शब्दैः पूरयत—**

(क) भीता .......... तद्वद् वर्णान् प्रयोजयेत्।

(ख) .................. लयसमर्थं च षडेते पाठका गुणाः।

(ग) गीती शीघ्री .................. तथा लिखितपाठकः।

(घ) एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च .............।

(ङ) स्वजनः ....... माभूत् सकलं शकलं सकृत् शकृत्।

**उत्तरम्—** (क) पतन-भेदाभ्यां, (ख) धैर्यं, (ग) शिरः कम्पी, (घ) पीड़िता, (ङ) श्वजनो।

**6. अधोलिखितानि वाक्यानि सत्यम् वा असत्यम् वा इति लिखत—**

यथा—पदच्छेदः पाठकानां गुणः अस्ति।
सत्यम/असत्यम

(क) गानसहितपठनं पाठकानां दोषः भवति। ( )

(ख) माधुर्यं नाम अक्षराणाम् उच्चारणे स्पष्टता अस्ति। ( )

(ग) शकृत् नाम एकवारम् इति अर्थः अस्ति। ( )

(घ) अव्यक्ताः वर्णाः प्रयोक्तव्याः भवन्ति। ( )

(ङ) व्याघ्री यथा पुत्रान् हरति तथा वर्णान् प्रयोजयेत्। ( )

**उत्तरम्—** (क) सत्यम्, (ख) सत्यम्, (ग) असत्यम्, (घ) असत्यम्, (ङ) सत्यम्।

# अतिरिक्त अभ्यासः

**1.** उचितम् उत्तरं चित्वा क्रमाक्षरं लिखत—

(i) स्वजनस्य स्थाने श्वजनं वदिष्यति तर्हि श्रोतुः किं भवति?

(अ) सम्मान (ब) अपमान

(स) सद्गुणज्ञान (द) दुर्गुणज्ञान

(ii) व्याघ्री कठोरं न गृह्णाति।

(अ) गतनं सम्भवति

(ब) क्षति भवितु शक्नोति

(स) दिवंगच्छति

(द) हानिष्यति

(iii) वर्णा प्रोक्तव्याः—

(अ) अव्यक्ताः (ब) अनाव्यक्ताः

(स) नाव्यक्ताः (द) व्यक्ताः

(iv) माधुर्येण स्पष्टम् उच्चारणम् कीदृशः?

(अ) शुद्धम् (ब) आदर्शम्

(स) अशुद्धम् (द) अव्यक्तम्

**उत्तरम्—** (i) (ब), (ii) (ब), (iii) (द), (iv) (ब)।

**2. समुचितेन पदेन रिक्तस्थानानि पूरयत—**

(क) वर्णा प्रोक्तव्याः ..................।

(ख) सम्यग्वर्ण प्रयोगेण .................. महीयते।

(ग) यदच्छेदस्तु ..................।

(घ) लयसमर्थं च षडेते .................. गुणाः।

**उत्तरम्—** (क) नाव्यक्तव्या, (ख) ब्रह्मलोके, (ग) सुस्वर:, (घ) पाठका:।

**3. सत्यम् असत्यं वा चिनुत—**

(क) मधुरेण न स्पष्टम् उच्चारणम्। ( )

(ख) पठनम् इति कौशलम्। ( )

(ग) असावधान उच्चारणेन समाने सम्मान प्राप्नेति। ( )

(घ) अव्यक्ता: पीड़िता: च वर्णा प्रयोक्तव्या:। ( )

**उत्तरम्—** (क) असत्यम्, (ख) सत्यम्, (ग) असत्यम्, (घ) असत्यम्।

**4. उचितेन पदेन सह मेलयत—**

| (क) | (ख) |
|---|---|
| (क) धैर्य लयसमर्थं च | वर्धयाम: |
| (ख) सम्यक्वर्णप्रयोगेण | कौशलम् |
| (ग) पठनम् इति | षडेते पाठका गुणा: |
| (घ) एतान् गुणान् | ब्रह्मलोके महीयते |

**उत्तरम्—**

| (क) | (ख) |
|---|---|
| (क) धैर्य लयसमर्थं च | षडेते पाठका गुणा: |
| (ख) सम्यक्वर्णप्रयोगेण | ब्रह्मलोके महीयते |
| (ग) पठनम् इति | कौशलम् |
| (घ) एतान् गुणान् | वर्धयाम: |

**5. एकपदेन उत्तरत—**

(क) सन्देह विना पठनाय किं भवेत्?

**उत्तरम्—** धैर्यम्।

(ख) समुचित स्वरेण कथनम् भवति—

**उत्तरम्—** सुस्वर:।

(ग) पठनकाले वयम् एतान् दोषान् .......... पठाम:।

**उत्तरम्—** पारिष्कृत्य।

(घ) गीतगानम् इव पठति स ......... भवति।

**उत्तरम्—** गीती।

**6. पूर्णवाक्येन उत्तरत—**

(क) के षड् दोषा पाठका: अधमा:?

**उत्तरम्—** गीती, शीघ्री, शिर: कम्पी, लिखित पाठक: अनर्थज्ञ अल्प कण्ठ: च।

(ख) पाठकानां कति दोषा: प्रोक्ता:?

**उत्तरम्—** पाठकानां षड्दोषा: प्रोक्ता।

(ग) य: मन्द स्वरेण पठति स: कीदृश: पाठक:?

**उत्तरम्—** य: मन्द स्वरेण पठति स: अधमा: पाठक:।

(घ) गीतगानमिव पठति स: कीदृश: पाठक:?

**उत्तरम्—** स: अधमश्रेण्या: पाठक: भवति।

7. एतान् अपि प्रश्नान् पूर्ण वाक्यै: उत्तरत।

(क) अन्तिमश्लोकस्य भावार्थं लिखत।

**उत्तरम्—** य: जन: गीतगायनम् इव पठति, शीघ्र शीघ्र वेगेन वा पठति, मस्तिष्क दोलनं कृत्वा पठति, य: जन: लिखित्वा लिखित्वा पठति, अर्थबोधं बिना पठति, मन्द स्वरेण पठति स: अधम: पाठक: इति उच्यते। अत: पठन्काले वयम् एतान् दोषाम् परिष्कृत्य पठाम:।

(ख) पाठकस्य षड्गुणान् स्पष्टं कुरुत।

**उत्तरम्—** मधुरेण स्पष्टम् उच्चारणम्, अपेक्षित स्थाने पदच्छेद:, सर्वेषां श्रवण योग्येन समुचित स्वरेण कथनम् सन्देह बिना पठनाय धैर्यं, विषये तल्लीनता इति एते उत्तम पाठकस्य षड् गुणा:।

# 13 वर्णोच्चारण–शिक्षा–1

**1. अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन द्वि पदेन वा उत्तरत—**

(क) उरसि किं तन्त्रं भवति?

(ख) नाभिप्रदेशे स्थिता: मांसपेश्य: किं नोदयन्ति?

(ग) आस्यस्य आभ्यन्तरे वर्णानाम् उत्पत्त्यर्थं द्वितीयं तत्त्वं किम् अस्ति?

(घ) आस्ये कति स्थानानि सन्ति?

(ङ) स्थानस्य कार्यनिदर्शनार्थं किं समुचितम् उदाहरणम् अस्ति?

(च) करणानि मुरल्या: कस्य भागम् इव व्यवहरन्ति?

**उत्तरम्—** (क) वायु–बलतन्त्रम्, (ख) उर:, (ग) करणम्, (घ) षट्, (ङ) मुरली, (च) आस्यस्य स्थानानि।

**2. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

(क) करणं किं भवति?

**उत्तरम्—** वर्णस्य उच्चारणसमये आस्यस्य य: भाग: स्थानं स्पृशति समीपं वा याति स: भाग: करणम् भवति।

(ख) उर: श्वासकोशस्थितं वायुं कुत्र नि:सारयति?

**उत्तरम्—** उर: श्वासकोशस्थितं वायुं ऊर्ध्वं नि:सारयति।

(ग) मुरल्या: अङ्गुलिच्छिद्राणि कीदृशं व्यवहरन्ति?

**उत्तरम्—** मुरल्या: अङ्गुलिच्छिद्राणि आस्यस्य स्थानानि इव व्यवहरन्ति।

(घ) केषां वर्णानाम् उच्चारणे जिह्वा प्राय: निष्क्रिया भवति?

**उत्तरम्—** कण्ठ्यानाम्, ओष्ठ्यानां नासिक्यानां च वर्णानाम् उच्चारणे जिह्वा निष्क्रिया भवति।

(ङ) तालव्यानां, मूर्धन्यानां, दन्त्यानां च वर्णानाम् उच्चारणार्थं सामान्यं करणं किम् अस्ति?

**उत्तरम्—** तालव्यानां मूर्धन्यानां दन्त्यानां च वर्णानाम् उच्चारण ो जिह्वा करणं भवति।

(च) कण्ठ्यानां, ओष्ठ्यानां, नासिक्यानां च वर्णानाम् उच्चारणार्थं स्थानस्य करणस्य च मध्ये किं भवति?

**उत्तरम्—** कण्ठ्यानाम्, ओष्ठ्यानां नासिक्यानां च वर्णानां उच्चारणार्थं स्थानस्य करणस्य मध्ये स्वस्थानं करणम् भवति।

**3. अधोलिखितेषु वाक्येषु आम् / न इति लिखित्वा उचितभावं सूचयत—**

(क) श्वासकोशस्थित: वायु: ऊर्ध्वं चरन् पूर्वम् आस्यं प्राप्नोति।

(ख) सर्वप्रथमं नाभि –प्रदेशे स्थिता: मांसपेश्या: कण्ठं नोदयन्ति।

(ग) आस्यस्य आभ्यन्तरे वर्णानाम् उत्पत्त्यर्थम् आभ्यन्तर–प्रयत्न: आवश्यकम् अस्ति।

(घ) तालव्य–वर्णानाम् उच्चारणार्थं दन्त: स्थानं स्पृशति।

(ङ) मूर्धन्यानां वर्णानाम् उच्चारणार्थं जिह्वा स्थानं स्पृशति।

(च) तत्तत्स्थानस्य एव कश्चित् पूर्वभाग:, तत्तत्स्थानस्य परभागं स्पृशति।

**उत्तरम्—** (क) न, (ख) न, (ग) आम्, (घ) न, (ङ) आम् (च) न।

**4. मुखे उपलभ्यमानानि स्थानानि बहिष्ठात् अन्त: यथाक्रमं (अर्थात् विपरीत-क्रमेण) लिखन्तु—**

**उत्तरम्—**

(क) मूर्धा .......................... ओष्ठ:

(ख) दन्त: .......................... दन्त:

(ग) तालु .......................... तालु (ङ) ओष्ठः .......................... कण्ठः
(घ) कण्ठः .......................... मूर्धा

**5. यथायोग्यं मेलनं कुरुत—**

| सामान्य-स्थानम् | विशेष-स्थानम् | सामान्य-करणम् | विशेष-करणम् |
|---|---|---|---|
| ओष्ठः | मूर्धा | स्वस्थानं करणम् | अधरोष्ठः |
| दन्तः | नासिकामूलस्य उपरिभागः | जिह्वा करणम् | जिह्वाग्रः |
| नासिका | तालु | स्वस्थानं करणम् | जिह्वामध्यः |
| कण्ठः | उत्तरोष्ठः | जिह्वा करणम् | कण्ठस्य अग्रभागः |
| मूर्धाः | दन्तः | स्वस्थानं करणम् | नासिकामूलस्य अधोभागः |
| तालु | कण्ठस्य पृष्ठभागः | जिह्वा करणम् | जिह्वोपाग्रः |

**उत्तरम्—**

| सामान्य स्थानम् | | विशेष स्थानम् |
|---|---|---|
| ओष्ठः | — | उत्तरौष्ठ |
| दन्तः | — | दन्तः |
| नासिका | — | नासिकामूलस्य उपरिभागः |
| कण्ठः | — | कण्ठस्य पृष्ठभागः |
| मूर्धा | — | मूर्धा |
| तालु | — | तालु |

# अतिरिक्त अभ्यासः

**1. उचितम् उत्तरं चित्वा क्रमाक्षरं लिखत—**

(i) शब्दानां सम्यक् शुद्धं च किं नितान्तम् महत्वपूर्णम्?
(अ) उच्चारणम् (ब) लेखनम्
(स) वदनम् (द) पठनम्

(ii) शब्दस्य कस्य शुद्धं निर्दुष्टम् उच्चारणं भवेत्?
(अ) मात्राया (ब) वर्णस्य
(स) व्यंजनस्य (द) स्वरस्य

(iii) शब्दस्य प्रत्येक वर्णस्य शुद्धं निर्दुष्टम् किं भवेत्?
(अ) उच्चारणम् (ब) पठनम्
(स) लेखनम् (द) अवगमनम्

(iv) वर्णानां भेदानां विषये वयं कुत्र ज्ञातवन्तः?
(अ) पूवेषु पाठेषु (ब) पूर्वासु कक्षासु (स) पूर्वेषु वर्षेषु
(द) पूर्व भागेषु

**उत्तरम्—** (i) (अ), (ii) (ब), (iii) (अ), (iv) (ब)।

**2. समुचितेन पदेन रिक्तस्थानानि पूरयत—**

(क) शब्दानां सम्यक् शुद्धं च ............... नितान्तम् आवश्यकम्।

(ख) शब्दस्य सम्यक् उच्चारणार्थं ............... शुद्धं निर्दुष्टम्। उच्चारणं भवेत।

(ग) वर्णानां ............... विषये वयं पूर्वासु कक्षासु ज्ञातवन्तः।

(घ) तत्र आस्ये ............... अपि वयं दृष्टवन्ता।

**उत्तरम्—** (क) उच्चारणम् (ख) वर्णस्य (ग) विविध भेद-उपभेदानाम् (घ) षट् उच्चारण स्थानानि।

**3. सत्यम् असत्यं वा चिनुत—**

(क) वर्णानाम् उच्चारणार्थ आस्येन सह शरीरस्य इतरेषां अङ्गानां उपयोगः न। ( )

(ख) उच्चारणे केवल आस्यस्य उपयोगं भवति। ( )

(ग) आस्ये षड् उच्चारणस्थानानि। ( )

(घ) वर्णानां विविधः भेदोपभेदाः भवन्ति। ( )

**उत्तरम्—** (क) असत्यम्, (ख) असत्यम्, (ग) सत्यम्, (घ) सत्यम्।

**4. समुचित पदेन मेलयत—**

| **(क)** | **(ख)** |
|---|---|
| (क) नाभि प्रदेशः | उच्चारण तन्त्र |
| (ख) उरः | ध्वनि तन्त्र |
| (ग) कंठबिलः | मांसपेशी बल तन्त्र |
| (घ) आस्यम् | वायु बल तन्त्र |

**उत्तरम्—**

| **(क)** | **(ख)** |
|---|---|
| (क) नाभि प्रदेशः | मांसपेशी बलतन्त्र |
| (ख) उरः | वायु बलतन्त्र |
| (ग) कंठबिलः | ध्वनितन्त्र |
| (घ) आस्यम् | उच्चारणतन्त्र |

**5. एकपदेन उत्तरत—**

(क) मुखं नासिका च कस्य अभ्यन्तरे भवतः?

**उत्तरम्—** आस्यस्य।

(ख) उच्चारण तन्त्रं किम् उच्यते?

**उत्तरम्—** आस्यम्।

(ग) किम् ध्वनि तन्त्रम्?

**उत्तरम्—** कण्ठबिलः।

(घ) वायु बल तन्त्रं कुत्र भवति?

**उत्तरम्—** उरसि।

**6. पूर्णवाक्येन उत्तरत—**

(क) उरः कः नोदयति?

**उत्तरम्—** नाभिप्रदेशं स्थिता: मांसपेश्यः उरः नोदयन्ति।

(ख) उरः किं निःसारयति?

**उत्तरम्—** उरः पुनः श्वास कोश स्थितं वायुम् ऊर्ध्वम् निःसारति।

(ग) वायुः ऊर्ध्वम् सरन् कुत्र प्राप्नोति?

**उत्तरम्—** वायु ऊर्ध्वम् सरन् आस्यं प्रविशति।

(घ) वायु ऊर्ध्वम् सरन् आस्यं कदा प्रविशति?

**उत्तरम्—** वायु ऊर्ध्वम् सरन् कण्ठबिल प्राप्नोति।

**7. एतान् प्रश्नान् अपि पूर्ण वाक्यैः उत्तरत।**

(क) वायु कथं वर्णरूपेण प्रकटी भवति?

**उत्तरम्—** आस्यस्य अभ्यन्तरं प्रविशन् मुखे नासिकायां वा स्थितेषु षट्सु उच्चारण स्थानेषु वर्णानुसारं स्वकीय स्थानं प्राप्य, सः वायुः तस्मिन् स्थाने वर्णरूपेण प्रकटी भवति।

(ख) वर्णानामुच्चारणम् किं आस्यमेव उपयुक्तः।

**उत्तरम्—** वर्णानाम् उच्चारणार्थम् आस्येन सह शरीरस्य इतरेषाम् अपि अङ्गाना उपयोगः भवति।